# अथ चिन्तामणि विधानम्

यह अनुष्ठान २ महीने में किया जाता है। कुल ३.५ लाख जप करना पडेगा। किसी भी मास के कृष्ण पक्ष (आश्विन् कृष्ण पक्ष को छोड कर) का प्रतिपदा से शुरु करके उस मास की अपेक्षा से दूसरे मास की पूर्णिमा का दिन समाप्त किया जाता है। पूर्णिमा के दिन उपवास रखना होगा। सूर्यास्त से २.५ घण्टे के अनन्तर रात्री में हवन करना है। हवनकुण्ड का निर्माण ३६ ईंटों से करना है। उसका आकार षट्कोण होगा। कुल ३०,००० आहुतियाँ देनी हैं। उनमें से १५,००० आहुति खीर का होगा जो की ६ किलो दूध में २ किलो चावल डालकर तैयार करना है। शेष १५,००० आहुति काला तिल में हवन सामग्री मिलाकर देना है।

पंचांगवेदी से अतिरिक्त भुवनेश्वरीदेवी, नवयोगिनी एवं सर्वतोभद्रमण्डल केलिये ३ पृथक् पीठों को तैयार करना है। हवनकुण्ड से अतिरिक्त माला संस्कार केलिये १ स्थण्डिल का निर्माण करना होगा।

पूर्वदिनकृत्यं :-

चन्द्रतारादिबलान्विते सुदिने सुमुहूर्ते तीर्थपुण्यक्षेत्रनिर्जनस्थानादौ अनुष्ठानयोग्यभूमेः परिग्रहं कृत्वा तत्र मार्जनदहनखननसंप्लावनादिभिः स्मृत्युक्तैः शोधनोपायैः शुद्धिं संपाद्य पुरश्चरणात् प्राक् तृतीयदिवसे क्षौरादिकं विधाय शुद्धः सन् जपस्थानस्य चतुर्दिक्षु क्रोशं क्रोशद्वयं वा क्षेत्रं चतुरस्रमाहारादिविहारार्थं परिकल्प्य जपस्थानभूमौ कूर्मसंशोधनं कुर्यात्। ततो जपस्थानस्य चतुर्दिक्षु अश्वत्थोदुम्बरप्लक्षाणामन्यतमस्य वितस्तिमात्रान्दशकीलान् " ऊँ नमः सुदर्शनाय अस्त्राय फट् " इति मंत्रेणाष्टोत्तरशताभिमन्त्रितान् " ऊँ ये चात्र विघ्नकर्तारो भुवि दिव्यन्तरिक्षगाः। विघ्नभूताश्च ये चान्ये मम मन्त्रस्य सिद्धिषु।।१।। मयैतत्कीलितं क्षेत्रं परित्यज्य विदूरतः। अपसर्पन्तु ते सर्वे निर्विघ्नं सिद्धिरस्तु मे।।२।।" इति मन्त्रद्वयेन निखनेत्। ततस्तेषु "ऊँ सुदर्शनायास्त्राय फट्" इति मन्त्रेण प्रत्येकमस्त्रं संपूज्य तत्रैव पूर्वादिक्रमेण इन्द्रादिलोकपालानावाह्य पंचोपचारैः संपूजयेत्। ततो जपस्थानमध्ये गणेशं कूर्मानन्तवसुधाक्षेत्रपाल वास्तुपुरुषान् द्विजाश्च संपूज्य दिक्पालेभ्यः क्षेत्रपालवास्तुगणपतिभ्यश्च माषभक्तबलीन् दत्वा बाह्ये भूतबलिं दद्यात्। तत्र मंत्रः " ऊँ ये रौद्रा रौद्रकर्माणो रौद्रस्थान निवासिनः। मातरोऽप्युग्ररूपाश्च गणाधिपतयश्च ये।।१।। विघ्नभूताश्च ये चान्ये दिग्विदिक्षु समाश्रिताः। ते सर्वे प्रीतमनसः प्रतिगृह्णन्त्विमं बलिम्।।२।।" इति मन्त्रद्वयेन दशदिक्षु भूतेभ्यो बलिं दत्वा हस्तौ पादौ प्रक्षाल्याचामेत्। ततो देवतोपास्तिं चिकीर्षुस्तत्रादौ रात्रौ शुभाशुभस्वप्नं विचारयेत्। तद्यथा - स्नानादिकं कृत्वा हरिपादाम्बुजं स्मृत्वा कुशासनादिशय्यायां यथासुखं सुप्त्वा वृषध्वजं प्रार्थयेत्। तत्र मन्त्राः " ऊँ भगवन् देवदेवेश शूलभृद् वृषवाहन। इष्टानिष्टे समाचक्ष्व मम सुप्तस्य शाश्वत।।१।। ऊँ नमोऽजाय त्रिनेत्राय पिंगलाय महात्मने। वामाय विश्वरूपाय स्वप्नाधिपतये नमः।।२।। स्वप्ने कथय मे तथ्यं सर्वकार्येष्वशेषतः।। क्रियासिद्धिं विधास्यामि त्वत्प्रसादान्महेश्वर।।३।।" एभिर्मन्त्रैः शिवं प्रार्थ्य निद्रां कुर्यात्ततो निशि दृष्टं स्वप्नं प्रातर्गुरवे निवेदयेत् वा स्वयं विचारयेत्। ततो ब्राह्मे मुहूर्ते उत्थाय प्रातः

स्मरणं कृत्वा उषसि दन्तधावनपूर्वकं स्नात्वा सन्ध्यादिनित्यक्रियां प्रातः संपाद्य शरीरशुद्धय प्रायश्चित्तं कुर्यात्। तद्यथा - तत्रादौ नदीतडागादिकं गत्वा सुप्रक्षालिततीरे स्नानोपकरणानि स्थापयेत्। ततः पाणिपादं प्रक्षाल्य नाभिमात्रं जलं गत्वा कुशपवित्रहस्तो बद्धशिखी आचम्य देशकालौ संकीर्त्य - 'मम ज्ञाताज्ञातसमस्तपापक्षयार्थं करिष्यमाणभुवनेश्वरीदेवीमन्त्रपुरश्चरणाधिकारार्थं शरीरशुद्ध्यर्थं तदर्थप्रायश्चित्तांगभूतकर्मण्यादौ भस्मादिभिरष्टौ स्नानानि करिष्ये' इति संकल्प्य वामहस्ते यज्ञियभस्म गृहीत्वा पश्चादुदकमिश्रणानन्तरं दक्षिणहस्तेन संमर्द्याभिमंत्रयेत्। तत्र मन्त्राः :-

'ऊँ अग्निरिति भस्म। ऊँ वायुरिति भस्म। ऊँ जलमिति भस्म। ऊँ स्थलमिति भस्म। ऊँ व्योमेति भस्म। ऊँ सर्वठं हवा इदं भस्म। ऊँ मन एतानि चक्षूंषि भस्मानि' इत्यभिमन्त्र्य 'ऊँ ईशानः सर्वविद्यानामीश्वरः सर्व भूतानाम्। ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मेऽस्तु सदा शिवोम् ।।१।। ऊँ ईशानाय नमः' - इति शिरसि मर्दयेत्। 'ऊँ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात्।।२।। ऊँ तत्पुरुषाय नमः' - इति मुखे मर्दयेत्। 'ऊँ अघोरेभ्योऽथ घोरघोरतरेभ्यः सर्वेभ्यः शर्वसर्वेभ्यो नमस्तेऽस्तु रुदरूपेभ्यः।।३।। ऊँ अघोराय नमः' - इति हृद्ये। 'ऊँ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमः।।४।। ऊँ वामदेवाय नमो' - गुह्ये मर्दयेत्।। 'ऊँ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः।। भवे भवेनातिभवे भवस्व मां भवोद्भवाय नमः।।५।। ऊँ सद्योजाताय नमः' पादयोः।। 'ऊँ प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने। सठंसृज्य मातृ भिष्ट्वं पुनरासदः।।६।।' इति मन्त्रेण प्रणवेन वा सर्वांगे च भस्म विलिम्पेत्। ततः स्नात्वाऽऽचम्य गोमयस्नानं कुर्यात् - तद्यथा - शुद्धगोमयमादाय प्रणवेन दिक्षु दक्षिणभागं तीर्थे चोत्तरभागं प्रक्षिप्य शेषम् -

ऊँ अग्रमग्रन्चरन्तीनामौषधीनां रसं वने। तासां वृषभपत्नीनां पवित्रं
कायशोधनम्। यन्मे रोगांश्च पापं मे हर गोमय।।१।।
ऊँ मानस्तोके तनये मानऽआयुषिमानो गोषुमानोऽअश्वेषु रीरिषः।।
मानो वीरान्रुद्र भामिनोऽवधीर्हविष्मन्तः सदमित्वा हवामहे।।२।।
इत्यभिमन्त्र्य सूर्याय दर्शयित्वा।।
ऊँ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्।।१।।

इति मन्त्रेण दक्षिणहस्तगृहीतेन गोमयेन शिरसो नाभ्यन्तं, वामहस्तगृहीतेन मन्त्रावृत्त्या नाभितः पादपर्यन्तं विलेपनमिति सर्वांगमालिप्य स्नात्वा त्रिराचामेत्।।

अथ मृत्तिकास्नानम् - शुद्धतीर्थमृत्तिकामादाय

अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे।
मृत्तिके हर मे पापं यन्मया कायसंचितम्।।१।।
उद्धृतासि वराहेण कृष्णेन शतबाहुना।

मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम्।।२।।
त्वया हतेन पापेन सर्वपापैः प्रमुच्यते। - इत्यभिमन्त्र्य
ॐ इदम्विष्णुर्विचक्रम त्रेधा निदधे पदम्। समूढमस्यपाठ्ँसुरे स्वाहा।।
इति मन्त्रेण शिरःप्रभृत्यंगानि विलिम्पेत्। ततो त्रिराचम्य शुद्धोदकस्नानं कुर्यात्।।
ॐ आपोहिष्ठामयोभुवस्तानऽऊर्ज्जे दधातन। महेरणाय चक्षसे।।१।।
यो वः शिवतमोरसस्तस्य भाजयते ह नः । उशतीरिवमातरः।।२।।
तस्मा अरंगमामवो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः।३।।
इति स्नात्वा आचम्य पंचगव्यस्नानं कुर्यात्। गायत्र्या गोमूत्रम्।।१।।
ॐ गन्धद्वारेति गोमयम्। ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्।।२।।
ॐ आप्यायस्वेति पयःस्नानम्। ॐ आप्यायस्व स मे तु ते विश्वतः
सोमवृष्ण्यम्। भवावाजस्य संगथे।।३।।
ॐ दधिक्राव्णेति दधिस्नानम्।
ॐ दधिक्राव्णोऽअकारिषं जिष्णोरश्वस्य वाजिनः।।
सुरभिनो मुखाकरत्प्राणऽआयूठ्ँषि तारिषत्।।४।।
ॐ तेजोऽसीत्याज्यस्नानम्।
ॐ तेजोऽसि शुक्रमस्यमृतमसि धामनामासि
प्रियन्देवानामनाधृष्टन्देवयजनमसि।।५।।
ॐ देवस्य त्वेति कुशोदकस्नानम्।
ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम्।।६।।
एवं पंचगव्यस्नानं कृत्वा शुद्धोदकेन स्नात्वा जले अघमर्षणम् कुर्यात् ।
'ॐ द्रुपदादिव मुमुचानः स्विनः स्नातो मलादिव। पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः।।' इति च वारत्रयमावर्तयेत्। ततः स्नानांगतर्पणम्। सव्येन प्राङ्मुखः। ॐ ब्रह्मादयो देवास्तृप्यन्ताम् ।।१।।
ॐ गौतमादय ऋषयस्तृप्यन्ताम्।।१।।
इति देवतीर्थेन एकैकमंजलिं जले क्षिपेत्। तत उदङ्मुखो यज्ञोपवीतं कण्ठीकृत्य -
ॐ सनकादयो मनुष्यास्तृप्यन्ताम्।।२।।
इति प्रजापतितीर्थेन अंजलिद्वयं दद्यात्। ततोऽपसव्येन दक्षिणाभिमुखः कृष्णतिलोदकैः
ॐ कव्यवाडनलादयो देवपितरस्तृप्यन्ताम्।।३।।
ॐ अस्मत्पितृपितामहप्रपितामहास्तृप्यन्ताम्।।३।।
ॐ अस्मन्मातृपितामहीप्रपितामह्यस्तृप्यन्ताम्।।३।।
ॐ अस्मन्मातामहप्रमातामहवृद्धप्रमातामहास्तृप्यन्ताम्।।३।।
ॐ अस्मन्मातामहीप्रमातामहीवृद्धप्रमातामह्यस्तृप्यन्ताम्।।३।।
ॐ आब्रह्मस्तम्बपर्यन्तं जगन्तृप्यताम्।।३।।
एवं तर्पणं कृत्वा - ॐ यन्मया दूषितं तोयं मलैः शरीरसम्भवैः।।
तस्य पापस्य शुद्ध्यर्थं यक्ष्मैतत्ते तिलोदकम्।।
इति यक्ष्मणे जलं दद्यात्। ततस्तीरमागत्य

"ॐ अग्निदग्धाश्च ये जीवा ये येऽप्यदग्धा: कुले मम।।
भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम्।।४।।"
इति जलांजलिं तटे नि:क्षिपेत् एवं स्नानांगतर्पणं कृत्वा सव्येनाचम्य सूर्यायार्घ्यं दद्यात्।

"ॐ एहि सूर्य्य सहस्रांशो तेजोराशे जगत्पते।।
अनुकम्पय मां देव गृहाणार्घ्यं नमोऽस्तुते।।१।।"

ततो जलाद्बहिर्निष्क्रम्य अहतं श्वेतं सदशं धौतं वस्त्रं परिधाय उपवस्त्रं गृहीत्वा त्रिराचम्य गृहं गच्छेत्। इति नद्यादिस्नाने प्रयोग:।।

अथ गृहे स्नानं करोति चेत् - उद्धृतोदकेन वा उष्णोदकेन वा स्नानं न तु पर्युषितशीतोदकेन। ताम्रादिबृहत्पात्रे जलं गृहीत्वा।

"ॐ गंगे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धुकावेरि जलेऽस्मिन्सन्निधिं कुरु।।१।।
ॐ पृष्कराद्यानि तीर्थानि गंगाद्या सरितस्तथा।
आगच्छन्तु पवित्राणि स्नानकाले सदा मम।।२।। इति तीर्थान्यावाह्य

ॐ शन्नोदवीरभिष्टयऽआपोभवन्तु पीतये। शंन्नोराभिस्त्रवन्तुन:।।१।। आप: पुनंतु......।।२।। द्रूपदादिव मुमुचान: स्विन: स्नातो मलादिव। पूतं पवित्रेणेवाज्यमाप: शुन्धन्तु मैनस:।।३।। ऋतं च सत्यं चाभीद्धात्तपसोऽध्य जायत। ततो रात्र्यजायत। तत: समुद्रोऽर्णव:। समुद्रादर्णवादधि संवत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी। सूर्याचन्द्रमसौ धााता यथापूर्वमकल्पयत्। दिवं च पृथिवीं चान्तरिक्षमथो स्व:।।४।। आपो हि ष्ठा मयोभुव:। ता न ऊर्जे दधातन। महेरणाय चक्षसे। यो व: शिवतमो रस:। तस्य भजयतेह न:। उशतीरिव मातर:। तस्मा अरंगमाम व:। यस्य क्षयाय जिन्वथ। आपो जनयथा च न:।।५।।
इति पंचभिर्ऋग्भिरभिमन्त्र्य

'ॐ इमम्मे वरुणश्रुधी हवं मद्याच मृडय।।१।। त्वामवस्युराचके।।२।।
इत्यादिवारुणैर्मन्त्रै: स्नात्वा वक्ष्यमाणैश्चतुर्भिर्मन्त्रै: कुशत्रयेण शिरसि जलं प्रक्षिपेत्। तत्र मन्त्रा: -

ॐ सिसृक्षोर्निखिलं विश्वं मुहु: शुक्रं प्रजापते:।
मातर: सर्वभूतानामापो देव्य: पुनन्तु माम्।।१।।
अलक्ष्मीर्मलरूपा या सर्वभूतेषु संस्थिता।
क्षालयन्ति निजस्पर्शादापो देव्य: पुनन्तु माम्।।२।।
यन्मे केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्द्धनि।
ललाटे कर्णयोरक्ष्णोरापस्तद् घ्नन्तु वो नम:।।३।।
आयुरारोग्यमैश्वर्य्यमरिपक्षक्षय: सुखम्।
संतोष: क्षान्तिरास्तिक्यं विद्या भवतु वो नम:।।४।।

ततो हस्तयोरप आदाय नासिकायां संयोज्य 'ॐ ऋतं च सत्यं चाभीद्धात्तपसोऽध्य जायत। ततो रात्र्यजायत। तत: समुद्रोऽर्णव:। समुद्रादर्णवादधि संवत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी। सूर्याचन्द्रमसौ धााता यथापूर्वमकल्पयत्।

दिवं च पृथिवीं चान्तरिक्षमथो स्वः' इत्यघमर्षणं जपेत्। एवं स्नात्वा उपवस्त्रेण जलापनयनं कृत्वा शुष्कं शुभ्रं कार्पासवस्त्रं परिधाय स्नानार्द्रवस्त्रं परिपीड्य आचम्य तिलकं कुर्यात्। अथ तिलकविधिः।। तत्रादौ भस्मत्रिपुण्ड्रप्रकारः। वामहस्ते दक्षिणहस्तेन अग्निहोत्रोत्थितं भस्मादाय उदकमिश्रणानन्तरम् 'ऊँ अग्निरिति भस्म, ऊँ वायुरिति भस्म, ऊँ जलमिति भस्म, ऊँ स्थलमिति भस्म, ऊँ व्योमेति भस्म, सर्वठं हवा इदं भस्म मन एतानि चक्षूंषि भस्मानि' इति भस्माभिमन्त्र्य।

ऊँ त्रयम्बकं यजामहे सुगन्धिम्पुष्टिवर्धनम्।। उर्वारुकमिव बन्धनान्मृत्यो र्मुक्षीय मामृतात्।। ऊँ तत्पुरुषाय नमः। इति मंत्रेण भाले त्रिपुण्ड्रं कुर्यात्।।१।। ऊँ त्र्यम्बकं पठित्वा ऊँ अघोराय नमः इति दक्षिणांसे।।२।।

ऊँ त्र्यम्बकं पठित्वा ऊँ सद्योजाताय नमः इति वामांसे. ।।३।।

ऊँ त्र्यम्बकं पठित्वा वामदेवाय नमः इति जठरे।।४।।

ऊँ त्र्यम्बकं पठित्वा ऊँ ईशानाय नमः इति वक्षसि च त्रिपुण्ड्रं कुर्यात्।। अथवा तत्पुरुषादिनामस्थले

ऊँ तत्पुत्रुषाय विद्महे०।।१।। अघोरेभ्योऽथघोरेभ्यो ०।।२।। सद्योजातम्०।।३।। वामदेवाय०।।४।। ईशानः सर्वविद्यानाम्०।।५।। इति पंचमन्त्रैस्त्रिपुण्ड्रकाणि विधेयानि। एवं भस्मधारणं कृत्वा रुद्राक्षधारणं कार्यम्।।

प्रायश्चित्तहोमः-

तत्रादौ शुद्धमृदा चतुरस्रं स्थण्डिलं कृत्वा देशकालौ संकीर्त्य 'अथ प्रायश्चित्तपूर्वांगतया विहितमाज्येन सह पंचगव्यहवनं करिष्ये। तदंगतया पंचभूसंस्कारपूर्वकमग्निस्थापनं च करिष्ये' इति संकल्प्य पंचभूसंस्कारान् कृत्वा यथाविधि विड्नामाग्निं प्रतिष्ठाप्य पात्रासादनं कुर्यात्। तद्यथा अग्नेरुत्तरतः पलाशपत्रं यज्ञियकाष्ठं हरितानि सप्त कुशपत्राणि गोमूत्रादीनि पृथक्पृथक् पंचगव्यानि आज्यम् इत्यादिहवनद्रव्याणि निधाय दक्षिणत आज्याधिश्रपणानन्तरं पलाशपत्रपुटके ताम्रपात्रे वा गोमूत्रम् अष्टमाषं 'गायत्र्या' आदाय, श्वेतगोर्गोमयं षोडशमाषं 'गन्धद्वारेति' मन्त्रेण निक्षिप्य, पीतगोः क्षीरं द्वादशमाषम् 'ऊँ आप्यायस्वेति' मन्त्रेण ग्राह्यं, नीलाया दधि षण्माषम् 'ऊँ दधिक्राव्णेति' मन्त्रेण निक्षिप्य, कृष्णाया घृतम् अष्टमाषम् 'ऊँ तेजोऽसीति' मन्त्रेण गृह्णीयात्। यथोक्तगोरभावे श्वेताया अपि गोमूत्रादिकं ग्राह्यम्।। ततः 'देवस्य त्वेति' मन्त्रेण कुशोदकं चतुर्माषं च प्रक्षिप्य प्रणवेन यज्ञकाष्ठेनालोड्य प्रणवेनाभिमन्त्रयेत्। ततः अग्निपर्युक्षणानन्तरमाज्येन आघारावाज्य भागं हुत्वा अन्वाधानं कुर्यात्। तद्यथा- 'अस्मिनन्वाहितेऽग्नावग्निं वायुं सूर्यं प्रजापतिं चाज्येन प्रत्येकं व्यस्तसमस्तव्याहृत्या अष्टाविंशति संख्यया यक्ष्ये। पुनरत्र प्रधानं पृथिवीं विष्णुं रुद्रं ब्रह्माणमग्निं सोमं सवितारं प्रजापतिं परमात्मानं एता ब्रह्मकूर्चदेवताः मिलितपंचगव्यद्रव्येन एकैकयाऽऽहुत्या यक्ष्ये। शेषेण स्विष्टकृतं' इत्यादिनाऽन्वाधानसंकल्पं कृत्वा अथाज्येन प्रधानहोमः - ''ऊँ भूः स्वाहा इदमग्नये न मम, ऊँ भुवः स्वाहा इदं वायवे न मम, ऊँ स्वः स्वाहा इदं सूर्याय न मम, ऊँ भूर्भुवःस्वः स्वाहा इदं प्रजापतये न मम।'' एवं सप्तवारान् कृत्वाऽष्टाविंशत्याहुतयो देयं। एवं सप्तविंशतिवारान् कृत्वाऽष्टोत्तरशताहुतयो वा देयं। ततः पंचगव्येन प्रति

मन्त्रमेकैकाहुतिः। 'ॐ स्योना पृथिवि नो भवानृक्षरानिवेशनी। यच्छा नः शर्म्मसप्रथा : स्वाहा - इदं पृथिव्यै न मम।।१।। ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्यपां सुरे स्वाहा - इदं विष्णवे न मम।।२।। ॐ मानस्तोके तनये मानऽआयुषि मानो गोषु मानोऽअश्वेषु रीरिषः। मानो वीरान्रुद्रभामिनोऽवधीर्हविष्मन्तस्सदमित्वा हवामहे स्वाहा - इदं रुद्राय न मम।।३।। (उदकोपस्पर्शनम्) 'ॐ ब्रह्म यज्ञानं प्रथमम्पुरस्ताद्विशीमतः सुरुचो वेनऽआवः। सबुध्न्या उपमा अस्यविष्ठाः सतश्च योनिमसतश्च विवः स्वाहा। इदं ब्रह्मणे न मम।।४।। ॐ अग्नये स्वाहा इदमग्नये न ममः।।५।। ॐ सोमाय स्वाहा इदं सोमाय न मम।।६।।

ॐ तत्सवितु० स्वाहा इदं सवित्रे न मम।।७।।

ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम।।८।।

ॐ परमात्मने स्वाहा इदं परमात्मने न मम।।९।।

ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते न मम।।१०।।

ततो भूरादिप्रजापत्यन्ता नवाज्याहुतीर्हुत्वा संस्रवप्राशनादिप्रणीताविमोकान्तं कृत्वा ब्रह्मणे पूर्णपात्रं दद्यात् ततो देशकालौ संकीर्त्य 'अद्यदिनमारभ्य चिन्तामणि मंत्रपुरश्चरणं करिष्ये' इति द्विजान्पृष्ट्वा। 'कुरुष्व' इत्यनुज्ञातः पंचगव्यप्राशनं कुर्यात्। तत्र मन्त्रः - 'ॐ यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके।

प्राशनात्पंचगव्यस्य दहत्यग्निरिवेन्धनम्।।१।।

इति सर्वंहुतशेषपंचगव्यं प्रणवेन पिबेत्। ततः संकल्पितप्रायश्चित्तद्रव्यं ब्राह्मणेभ्यो दत्त्वा यथाशक्ति ब्राह्मणान् भोजयित्वा कृतं कर्म ईश्वरार्पणं कुर्यात्। एवं प्रायश्चित्तं कृत्वा - 'मंत्रसिद्ध्यर्थं गायत्र्या अयुतजपमहं करिष्ये' इति संकल्प्य स्वयं विप्रद्वारा वा कुर्यात्। एतानि मंत्राणि पठेत् - 'आपो हिष्ठा० इत्यादित्र्यृचं। स्वस्ति न० इत्याद्याः स्वस्तिमतीः। पुनंतु मा० इत्याद्याः पावमानीश्च सर्वा जप्त्वा - ॐ गायत्र्याऽऽचार्यमृषिं विश्वामित्रं तर्पयामि, गायत्रीश्छन्दस्तर्पयामि, सवितारं देवतां तर्पयामि' - इति तर्पणं कृत्वा 'कद्रुदाय' इत्यादीनि रुद्रसूक्तानि सकृज्जपेत्। तद्दिने उपवासो हविष्यान्नेनैकभक्तत्वं वा तिष्ठेत्।

<u>अथ माला संस्कार</u>:- तत्रादौ कुशोदकसहितैः पंचगव्यैर्मालां प्रक्षाल्य अश्वत्थपत्र नवकै रचिते कमले स्थापयित्वा -

ॐ ह्रीं अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं क्षं -

इत्येतानि मातृकाक्षराणि मूलमन्त्रं च मालायां विन्यस्य पुनः पंचगव्येन <u>प्रोक्ष्य</u> -

ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः।

भवे भवेनातिभवे भवस्व मां भवोद्भवाय नमः।।१।।

इति मन्त्रेण शीतजलेन <u>प्रक्षालयेत्</u>।

ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुदाय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः।।१।।
इति मन्त्रेण चन्दनागुरुकर्पूरादिसुगन्धद्रव्यैर्घर्षयेत्।
ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः।।
शर्वेभ्यः सर्वसर्वेभ्यो नमस्तेऽस्तु रुदरूपेभ्यः।।१।।
इति मन्त्रेण तां धूपयेत्।
ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात् ।।१।।
इति मन्त्रेण मालायाश्चन्दनं लेपयेत्।
ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम् ब्रह्माधिपति
र्ब्रह्मणोऽधिपतिर्ब्रह्म शिवो मेऽस्तु सदाशिवोम्।।१।।
इति मन्त्रेण मेरुसहितं प्रत्येकमणिं सकृत्सकृदेवाभिमंत्रयेत्। इत्यभिमन्त्र्य प्राणप्रतिष्ठां कुर्यात्।। तद्यथा- 'अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः। ऋग्यजुःसामानि छन्दांसि। क्रियामयवपुः प्राणाख्या देवता। आं बीजं ह्रीं शक्तिः क्रौं कीलकम् अस्यां मालायां प्राणप्रतिष्ठापने विनियोगः।
ॐ आं ह्रीं क्रौं अँ यँ रँ लँ वँ शँ षँ सँ हँ क्षँ अः क्रौं ह्रीं आं हंसः सोऽहं अस्यां मालायां इह प्राणास्तिष्ठन्तु।
ॐ आं ह्रीं क्रौं अँ यँ रँ लँ वँ शँ षँ सँ हँ क्षँ अः क्रौं ह्रीं आं हंसः सोऽहं अस्यां मालायां जीव इह स्थितः।
ॐ आं ह्रीं क्रौं अँ यँ रँ लँ वँ शँ षँ सँ हँ क्षँ अः क्रौं ह्रीं आं हंसः सोऽहं अस्यां मालायां सर्वेन्द्रियाणि। वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राण पाणिपादपायूपस्थानीहागत्य स्वस्ति सुखं चिरं तिष्ठन्तु स्वाहा।'
एवं प्राणप्रतिष्ठां कृत्वा पुष्पाक्षतान् कुंकुमाक्तान् निःक्षिप्य गर्भाधानादि पंचदशसंस्कारसिद्ध्यर्थं पंचदशप्रणवावृत्तिं कृत्वा प्राणशक्तिं ध्यायेत्-
"रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरुढा कराब्जैः
पाशं कोदण्डमिक्षूद्भवमथ गुणमप्यङ्कुशं पंचबाणान्।।
बिभ्राणासृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः।।१।।"
एवं प्राणशक्तिं ध्यात्वा तत्रेष्टदेवतामावाह्य मूलमन्त्रेण षोडशोपचारैः संपूज्य
"ॐ ह्रीं माले माले महामाये सर्वशक्तिस्वरूपिणी।
चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।।१।। इति प्रार्थ्य।
"अविघ्नं कुरु माले त्वं सर्वकार्येषु सर्वदा" -
इति तामादाय मालादेवीं ध्यायन् हृदये मालां धारयन् मन्त्रार्थं स्मरन् मध्यदिनावधि १० मालां मंत्रं जपेत् । तद्यथा-'ॐ नमो सर्वार्थसाधिनी स्वाहा'। ततः जपान्ते पुनः प्रणवमुच्चार्य -
"ॐ त्वं माले सर्वदेवानां प्रीतिदा शुभदा भव।
शिवं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा ।।१।।

तेन सत्येन सिद्धिं में देहि मातर्नमोस्तु ते। ॐ हीं सिद्ध्यै नमः।।

इति मालां शिरसि निधाय प्राणानायम्य गोमुखौ रहसि स्थापयेत्। ततः जपस्य दशांशं (१ मालां ) स्थण्डिले हवनं कुर्यात्।

अथ हवनार्थं स्थण्डिलकरणं :-

"कुण्डवन्मेखलां कृत्वा योनिं कृत्वा ततः परं।
बौधायने प्रोक्तं स्थण्डिलं चतुरस्रकं।।१।।

ततः शुद्धभूमौ चतुर्विंशत्यङ्गुल्यायतं स्थण्डिलं परिकल्पयेत्। तथा चोक्तम् -

"स्थण्डिलं मृन्मयं कार्यं चतुर्विंशाङ्गुल्यायतम्।
द्विरङ्गुलं भवेत्कण्ठं व्यासस्य वचनं यथा।"

## अग्निकर्म -

तत्र तावत्कुण्डसंस्कारादिपारस्करगृह्यसूत्रानुसारेण कार्यः :-

'परिसमुह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्याऽग्निमुपसमाधाय दक्षिणतो ब्रह्मासनं चास्तीर्य प्रणीय परिस्तीर्यार्थवदासाद्य पवित्रे कृत्वा प्रोक्षणीः संस्कृत्यार्थवत्प्रोक्ष्य निरूप्याज्यमधिश्रित्य पर्यग्निं कुर्यात्। स्रुवं प्रतप्य संमृज्याभ्युक्ष्य पुनः प्रतप्य निदध्यादाज्यमुद्वास्योत्पूयावेक्ष्य प्रोक्षणीश्च पूर्ववदुपयमनकुशानादाय समिधोऽभ्याधाय पर्युक्ष्य जुहुयादेष एव विधिर्यत्र क्वचिद्धोमः।' इति।

तत्र तावत्कर्ता सुस्नातः शुचिः शुक्लाम्बरधरस्सोत्तरीयः कर्मस्थानमागत्य वारणादियज्ञियवृक्षोद्भवासने प्रागग्रानुदगग्रान् वा कुशानास्तीर्य तत्र प्राङ्मुख उपविश्याचम्य प्राणानायम्य देशकालौ स्मृत्वा 'चिन्तामणिमंत्रपुरश्चरणकर्माङ्गतया भूसंस्कारान् करिष्ये' इति संकल्पं कुर्यात्। तथा च कात्यायन-

"संकल्प एव मुख्यः स्यात्स्नानदानादिकर्मसु।
कर्म संकल्परहितं तत्सर्वं निष्फलं भवेत्।।" इति।

तत्र परिसमूहनादिविचारः-

'परिसमुह्य' इतिसूत्रम्। त्रिभिर्दर्भैः पांसूनपसार्य।

कृमिकीटपतंङाश्च विचरति महीतले। तेषां संरक्षणार्थाय परिसमुह्येति कथ्यते।। धृत्वाङ्गुष्ठकनिष्ठाभ्यां मूलैः साग्रैः कुशत्रयम्। तदग्रैस्तस्य रजसां पूर्वस्यामपसर्पणम्।। 'उपलिप्य' इति सूत्रम्। 'गोमयोदकेन' इति 'पुरा इन्द्रेण वज्रेण हतो वृत्रो महासुरः। व्यापिता मेदसा पृथ्वी तदर्थमुपलेपनम्। गोमये वसते लक्ष्मीः पवित्रा सर्वमंगला। यज्ञार्थे संस्कृता भूमिस्तदर्थमुप लेपनं।।' गोमयलक्षणम् "रुग्णा वृध्दा प्रसूता च वन्ध्या संधिन्यमेध्यभुक्। मृतवत्सा च नैतासां ग्राह्यं मूत्रं शकृत्पयः।। स्वच्छं तु गोमयं ग्राह्यं स्थाने च पतिते शुचौ उपर्य्यधः परित्यज्य आर्द्रजन्तु विवर्जितम्। 'त्रिरुल्लिख्य' इति सूत्रम्। 'त्रिःखादिरेण हस्तमात्रेण खड्गाकृतिना स्फ्येन उल्लिख्य प्रागग्रा उदक्संस्थाः स्थण्डिल परिमाणास्तिस्रो रेखा कृत्वा' इति। 'उद्धृत्य' इति सूत्रम्। 'अनामिकांगुष्ठाभ्यां

यथोल्लिखिताभ्यो लेखाभ्य: पांसूनुद्धृत्य' इति । 'अभ्युक्ष्य' इति सूत्रम्। मणिकाद्भिरभ्युक्ष्याभिषिच्य इति । "आपो देव गणा: सर्वे आप: पितृगणा: स्मृता:। उत्तानेन तु हस्तेन कर्त्तव्यं प्रोक्षणं बुधै:।। अवाचीनेन हस्तेन कर्त्तव्यं तदवेक्षणम्। मुष्टिकृतेन हस्तेन चाभ्युक्षणमुदाहृतम्।।" एते पंच भूसंस्कारा:। अथ कुशकण्डिकाविचार::- 'अग्निमुपसमाधाय' इति सूत्रम् । कर्मसाधनभूतं लौकिकं स्मार्तं श्रौतं वाग्निम् आत्माभिमुखं स्थापयित्वा अग्निजिह्वानामानि-

"याभिर्हव्यं समश्नाति हुतं सम्यग् द्विजोत्तमै:। काली कराली च मनोजवा च सुलोहिता चैव सुधूम्रवर्णा।। स्फुलिंगिनी विश्वरुचिस्तथा च चलायमाना इति सप्त जिह्वा। एताश्चोक्ता विशेषेण ज्ञातव्या ब्राह्मणेन तु।। आहूय चैव होतव्यो यो यत्र विहितो विधि:। अविदित्वा तु यो ह्यग्निं होमयेदविचक्षण:।। न हुतं न च संस्कारो न तु यज्ञफलं भवेत्।" इति।। तत: हवनं कुर्यात्।।

## अथ मंत्र संस्कार: :-

"मन्त्राणां दश कथ्यन्ते संस्कारा: सिद्धिदायिन:। जननं जीवनं पश्चात्ताडनं बोधनं तथा।। अथाभिषेको विमलीकरणाप्यायने पुन:। तर्पणं दीपनं गुप्तिर्दशैता मंत्र संस्क्रिया।"

तेषां स्वरूपम् :- मन्त्राणां मातृकायन्त्रादुद्धारो जननं स्मृतम्।
प्रणवान्तरितान्कृत्वा मन्त्रवर्णान् जपेत्सुधी:।।
एतज्जीवनमित्याहुर्मन्त्रतन्त्रविशारदा:।
मन्त्रवर्णान्समालिख्य ताडयेच्चन्दनाम्भसा।।
प्रत्येकं वायुना मन्त्री ताडनं तदुदाहृतम्।
विलिख्य मन्त्रं तं मन्त्री प्रसूनै: करवीरजै:।।
तन्मन्त्राक्षरसंख्यातैर्हन्याद्वातेन बोधनम्।
स्वतन्त्रोक्तविधानेन मन्त्री मन्त्रार्णसंख्यया।।
अश्वत्थपल्लवैर्मन्त्रमभिषिंचेद्विशुद्धये।
संचिन्त्य मनसा मन्त्रं ज्योतिर्मन्त्रेण निर्दहेत्।।
मन्त्रे मलत्रयं मन्त्री विमलीकरणं त्विदम्।
तारं व्योमाग्निमनयुग्दण्डो ज्योतिर्मनुर्मत:।।
कुशोदकेन जप्तेन प्रत्यर्णं प्रोक्षणं मनो:।
तेन मन्त्रेण विधिवदेतदाप्यायनं मतम्।।
मन्त्रेण वारिणा मन्त्रतर्पणं तर्पणं स्मृतम्।
तारमायारमायोगे मनोर्दीपनमुच्यते।।
जप्यमानस्य मन्त्रस्य गोपनं त्वप्रकाशनम्।

संस्कारा दश संप्रोक्ताः सर्वतन्त्रेषु गोपिताः।।
यान्कृत्वा संप्रदायेन मन्त्री वांछितमश्नुते।।

ततः १० माला जपं कुर्यात्।

**प्रथमदिनकर्म-**

चन्द्रतारादिबलान्विते पूर्वोक्ते सुमुहूर्ते प्रातरुत्थाय तीर्थादौ यथाविधि स्नात्वा संध्यादिनित्यावश्यकं कर्म समाप्याचार्य जापकांश्चाहूय तेभ्य आसनार्घ्यादिकं दत्वा मंगलस्नानं कुर्यात्। तद्यथा - यजमानः शुद्धपीठे प्राङ्मुख उदङ्मुखो वा उपविश्य हस्तौ पादौ प्रक्षाल्य त्रिराचम्य प्राणानायम्य देशकालौ संकीर्त्य ब्राह्मणद्वारा स्वयं वा 'करिष्यमाणचिन्तामणिमंत्रपुरश्चरणकर्मांगतया मंगलस्नानमहं करिष्ये' - इति संकल्पः। ततो यथाचारं मंगलवाद्यघोषपुरःसरं पुत्रवतीवृद्धसुवासिनीभिर्हस्तैः सुगन्धितैलाभ्यंजनं तिलामलकादीनां सर्वौषध्यादिसुगन्धचूर्णेनोद्वर्तनम् उष्णोदकेन पत्न्या सह मंगलस्नानं कृत्वा नवं श्वेतं सदशं स्ववर्णेन सकृद्धौतं प्रागुदग्वा प्रसारितं नान्यधारितमहतं वस्त्रं नाभिपृष्ठकटिषु बद्धत्रिकच्छम्

'ॐ परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि।
शतं च जीवामि शरदः पुरुची रायस्पोषमभिसंव्ययिष्ये।।१।।'

इति मन्त्रेण परिधाय । ततः 'ॐ यशसा मा द्यावा पृथिवी यशसेन्द्राबृहस्पति।
यशो भगश्च मा विधद्यशो मा प्रतिपद्यताम्।।१।।'

इति मन्त्रोणोत्तरीयं धृत्वा यथाविधि नूतनयज्ञोपवीतं च धारयेत्।। पत्नी तु अहते क्षौमवस्त्रो श्वेतपीतरक्तरंजिते नीलरंजितं बिना अमन्त्रकं परिधाय प्रतिवस्त्रं स्मार्त विधिना त्रिराचमनम्।। ततः शुभासने प्राङ्मुख उपविश्य स्वदक्षिणतः पत्नीं चोपवेश्य करद्वये अनामिकामध्यपर्वणि कुशपवित्रमथवा यथाशक्ति सुवर्णात्मकं पवित्रीद्वयं च धृत्वा कुङ्कुमकेशरान्यतममंगलद्रव्येण तिलकं यथाचारं कृत्वा त्रिराचम्य 'ॐ अपवित्रः' इत्यनेन स्वशरीरं पूजासामग्रीन् संशोध्य प्राणानायम्य देशकालौ संकीर्त्य 'भो दीप देवरूपस्त्वं कर्मसाक्षी ह्यविघ्नकृत्। यावत्कर्मसमाप्तिः स्यात्तावत्त्वं सुस्थिरो भव।।' इत्यनेन दीपं प्रज्वाल्य शान्तिपाठं पठित्वा लक्ष्मीनारायणादिदेवान् प्रणमेत्।

**अथ शान्तिपाठ मन्त्राः-**

"ॐ आ नो भद्राः क्रतवो जन्तु विश्वतो दब्धासोऽअपरीतासऽउद्भिदः। देवा नो जथा सदमिद्वृधेऽसन्नप्रायुवो रक्षितारो दिवे दिवे।।१।। देवानां भद्रा सुमतिर्ऋजूयतान्देवानाठं रातिरभिनो निवर्तताम्। देवानाठं सख्यमुपसेदिमा वयन्देवानऽआयुः प्रतिरन्तु जीवसे।।२।। तान्पूर्वया निविदा हूमहे वयम्भगम्मित्रमदितिन्दक्षमस्त्रिधम्। अर्जमणम्वरुणठं सोममश्विना सरस्वती नः सुभगामयस्करत्।।३।। तन्नो वातो मयो भुवा तु भेषजन्तन्माता पृथिवी तत्पिता द्यौः। तद्ग्रावाणः सोमसुतो मयो भुवस्तदश्विना श्रृणुतान्धिष्ण्या जुवम्।।४।। तमीशानं जगतस्तस्थुषस्पति

न्धियन्जिन्वमवसे हूमहे वयम्।। पूषानो यथावेद सामसद्वृधेरक्षिता पायुरदब्धः स्वस्तये।।५।। स्वस्तिन इन्द्रो वृद्धाश्रवाः स्वस्तिनः पूषा विश्ववेदाः।। स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु।।६।। पृषदश्वामरुतः पृश्निमातरः शुभं जावानो विदथेषु जग्मयः। अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवाऽअव सागमन्निह।।७।। भद्रं कर्णेभिः श्रृणुयाम देवा भद्रम्पश्येमाक्षभिर्यजत्राः। स्थिरैरंगैस्तुष्टुवाठंसस्तनूभिर्व्यशेमहि देव हितं यदायुः।।८।। शतमिन्नु शरदोऽअन्ति देवा यत्रा नश्वचक्रा जरसन्तनूनाम्। पुत्रासो यत्र पितरो भवन्ति मानो मध्यारीरिष तायुर्गन्तोः।।९। अदितिद्यौरदितिरन्तरिक्ष मदितिर्माता स पिता स पुत्रः। विश्वेदेवाऽअदितिः पंचजनाऽअदिति र्जातमदितिर्जनित्त्वम्।।१०।। तम्पत्नीभिरनुगच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः। नाकं गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधिरोचने दिवः।।११।। आयुष्यं वर्चस्यठंरायस्पोषमौद्भिदम्। इदठंहिरण्यं वर्च्चस्व जैत्रायाविशता दुमाम्।।१२।। द्यौः शान्तिरन्तरिक्षठं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वठं शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि।।१३।। यतो यतः समीहसे ततो नोऽभयं कुरु। शन्नः कुरु प्रजाभ्योऽभयन्नः पशुभ्यः।।१४।। सुशान्तिर्भवतु।।ऊँ श्रीमहागणाधिपतये नमः।। ऊँ श्री लक्ष्मीनारायणाभ्यां नमः।। ऊँ श्री उमामहेश्वराभ्यां नमः।। ऊँ श्री वाणीहिरण्यगर्भाभ्यां नमः।। ऊँ श्री शचीपुरन्दराभ्यां नमः।। ऊँ श्री मातापितृचरणकमलेभ्यो नमः।। ऊँ श्री कुलदेवताभ्यो नमः।। ऊँ श्री इष्टदेवताभ्यो नमः।। ऊँ श्री ग्रामदेवताभ्यो नमः।। ऊँ श्री स्थानदेवताभ्यो नमः।। ऊँ श्री वास्तुदेवताभ्यो नमः।। ऊँ श्री सर्वेभ्यो देवभ्यो नमः।। ऊँ श्री सर्वेभ्यो ब्राह्मणेभ्यो नमो नमः। ऊँ पुण्यं पुण्याहं दीर्घमायुरस्तु।। ऊँ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्ननाशो विनायकः।।१।। धूम्रकेतु र्गणाध्यक्षो भालचन्द्रो गजाननः। द्वादशैतानि नामानि यः पठेच्छृणुयादपि।।२।। विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा। संग्रामे संकटे चैव विघ्नस्तस्य न जायते।।३।। शुक्लाम्बरधरं देवं शशिवर्णं चतुभुर्जम्। प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये।।४।। अभीप्सितार्थ सिद्ध्यर्थं पूजितो यः सुरासुरैः। सर्वविघ्नहरस्तस्मै गणाधिपतये नमः।।५।। वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ। निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा।।६।। सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके। शरण्ये त्र्यम्बके गोरि नारायणि नमोऽस्तुते।।७।। सर्वदा सर्वकार्येषु नास्ति तेषाममंगलम्। येषां

हृदिस्थो भगवान्मंगलायतनो हरिः।।८।। तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव। विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि।।९।। लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः।। येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः।।१०।। यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः। तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम।।११।। अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते। तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।।१२।। स्मृते सकलकल्याण भाजनं यत्र जायते। पुरुषं तमजं नित्यं व्रजामि शरणं हरिं।।१३।। सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः। देवा दिशन्तु नः सिद्धिं ब्रह्मेशान जनार्दनाः।।१४।। विश्वेशं माधवं ढुण्ढिं दण्डपाणिं च भैरवं वन्दे काशीं गुहां गंगां भवानीं मणिकर्णिकां।।१५।। विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान्। सरस्वतीं प्रणम्यादौ सर्वकार्यार्थसिद्धये।।१६।।' इति प्रणम्य संकल्पं कुर्यात्।।

<u>अथ संकल्पः</u>- तत्रादौ दक्षिणहस्ते कुशत्रययवगन्धपुष्पजलान्यादाय

ऊँ विष्णुर्विष्णुर्विष्णुः ऊँ तत्सद् ब्रह्म श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य श्रीब्रह्मणो द्वितीये परार्द्धे एकपंचाशत्तमे वर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसे अह्नो द्वितीये यामे तृतीये मुहूर्ते रथन्तरादि द्वात्रिंशत्कल्पानां मध्ये अष्टमे श्वेतवाराहकल्पे स्वंयभुवादिमन्वन्तराणां मध्ये सप्तमे वैवस्वतमन्वन्तरे कृतत्रेताद्वापरकलिसंज्ञानां चतुर्णां युगानां मध्ये वर्तमाने अष्टाविंशतितमे कलियुगे तत्प्रथमचरणे तथा पंचाशत्कोटियोजन विस्तीर्णभूमण्डलान्तर्गत सप्तद्वीपमध्यवर्तिनि जम्बूद्वीपे तत्रापि नवखण्डानां मध्ये नवसहस्रयोजनविस्तीर्णे भरतखण्डे तत्रापि परमपवित्रे भारते वर्षे आर्यावर्तान्तर्गत ब्रह्मावर्तैकदेशे उत्तराखण्डप्रदेशे ऋषिकेशक्षेत्रे श्रीगंगा यमुनयोर्मध्यदिग्भागे गंगाया तटे देवब्राह्मणानां सन्निधौ श्रीमन्नृपति विक्रमादित्यराज्यादमुकसंख्यापरिमिते प्रभवादिषष्टिसंवत्सराणां मध्ये अमुक नामसंवत्सरे अमुकायने अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते सूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथाराशिस्थानस्थितेषु सत्सु एवं गुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रोऽमुकशर्माहमात्मनः श्रुतिस्मृतिपुराणोक्तफलावाप्तये अस्मिन्पुण्याहे जन्मराशिः सकाशान्नामराशेः सकाशाद्वा जन्मलग्नाद्वर्षलग्नाद्गोचराद्वा ये केचिच्चतुर्थाष्टमद्वादशाद्यनिष्टस्थानस्थिताः क्रूरग्रहास्तैः सूचितं सूचयिष्यमाणं च यत्सर्वारिष्टं तद्विनाशार्थं सर्वदा तृतीयैकादशशुभस्थानस्थित-वदुत्तमबलप्राप्त्यर्थं तथा दशान्तर्दशोपदशादिनदशाजनितपीडाऽल्पायुराधि -

दैविकाधिभौतिकाध्यात्मिकजनितक्लेशनिवृत्तिपूर्वकशरीरारोग्यार्थं परमैश्वर्यादि प्राप्त्यर्थम् श्रीभुवनेश्वरीदेवताप्रसादसिद्ध्यर्थं चिन्तामणिमन्त्र पुरश्चरणं स्वयं ब्राह्मणद्वारा वा करिष्ये इति तदंगत्वेन गणपतिपूजनं स्वस्तिपुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धमाचार्यादिवरणं च करिष्ये।।' इति संकल्प्य गणेशाम्बिकापूजनं कृत्वा स्ववामे कर्मार्थजलपूरितकलशार्चनं कुर्यात् ।

'ॐ तत्त्वा जामि ब्रह्मणा वन्दमानस्तदाशास्ते जजमानो हविर्भिः।
अहेडमानो वरुणे हवोध्युरुशर्ठ समानऽआयुः प्रमोषीः।।१।।'

अस्मिन्कलशे 'ॐ वरुण इहागच्छेह तिष्ठ' इत्यावाह्य 'ॐ अपांपतये वरुणाय नमः' इति गन्धाक्षतपुष्पैः संपूज्य 'कलशस्य मुखे विष्णु' रित्याद्यभिमन्त्र्य - ॐ गंगे च युमने चैव गोदावरि सरस्वती। नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरू।।१।। अस्मिन्कलशे 'सर्वाणि तीर्थान्यावाहयामि पूजयामि नमस्करोमि' इति तीर्थान्यावाह्य प्रार्थयेत् (कलशवरुणपूजनयोर्विस्तृतविध्यर्थं भुवनेश्वरी रहस्य पुस्तके पृ ३१-३८ द्रष्टव्यः)।। ततो दूर्वाभिः कलशोदकेन संभारान् 'ॐ अपवित्रः पवित्रो वा सर्वास्थां गतोऽपि वा। यः स्मरेत्पुण्डरीकाक्षं स बाह्यभ्यन्तरः शुचिः।।१।। पुण्डरीकाक्षः पुनातु, पुण्डरीकाक्षः पुनातु, पुण्डरीकाक्षः पुनातु।। इति मन्त्रेण संप्रोक्ष्य दीपपूजनं कुर्यात्।

भो दीप त्वं ब्रह्मरूप अन्धकारनिवारक।
इमां मया कृतां पूजा गृह्णंस्तेजः प्रवर्धय।।१।। ॐ दीपाय नमः।

इति गन्धाक्षतपुष्पैः पूजयेत्।।

अथ <u>गणपति पूजनम्</u>।

तत्रादौ ध्यानम्- श्वेतांगं श्वेतवस्त्रं सितकुसुमगणैः पूजितं श्वेतगन्धैः
क्षीराब्धौ रत्नदीपैः सुरतरुविमे रत्नसिंहासनस्थम्।।
दोर्भिः पाशांकुशेष्टाभयधृतिविशदं चन्द्रमौलिं त्रिनेत्रं
ध्यायेच्छान्त्यर्थमीशं गणपतिममलं श्रीसमेतं प्रसन्नम्।।१।।

'ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहिताय महागणपतये नमः ध्यायामि' इति ध्यानम्।।१।। पुष्पाण्यादाय- हे हेरम्ब त्वमेह्येहि अम्बिकात्र्यम्बकात्मज।
सिद्धिबुद्धिपते त्र्यक्ष लक्षलाभपितुः पितः।।१।।
नागास्य नागहारत्वं गणराज चतुर्भुज।
भूषितः स्वायुधैर्दिव्यैः पाशांकुशपरश्वधैः।।२।।
आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः।
इहागत्य गृहाण त्वं पूजां क्रतुं च रक्ष मे।।३।।

'ॐ गणानान्त्वागणपतिर्ठं हवामहे प्रियाणान्त्वा प्रियपतिर्ठं हवामहे निधीनान्त्वा निधिपतिर्ठं हवामहे वसो मम।। आहमजानि गर्भधमात्वमजासि गर्भधम्।। ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहिताय महागणपतये नमः। गणपतिमा

वाहयामि, स्थापयामि' इत्यावाह्य 'ऊँ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणाधिपतये नमः' इति मंत्रेण पाद्यादिभिः षोडशोपचारैः संपूज्य विशेषार्घ्यं दद्यात्। (विस्तृत गणेशपूजनार्थं भुवनेश्वरी रहस्ये पृ १५-२२ अथवा गणेशाम्बिकयोः पूजनार्थं तत्रैव पृ २३-३० द्रष्टव्यः)।

ऊँ रक्षरक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक।
भक्तानामभयं कर्ता त्राता भव भवार्णवात्।।१।।
द्वैमातुर कृपासिन्धो षाण्मातुराग्रजप्रभो।
वरद त्वं वरं देहि वाञ्छितं वाञ्छितार्थद।।२।।
गृहाणार्घ्यमिदं देव सर्वदेवनमस्कृत।
अनेन सफलार्घ्येण फलदोऽस्तु सदा मम।।३।।
ऊँ भू० सि०म० विशेषार्घ्यं समर्पयामि ।। ततः प्रार्थना -

'विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय।
नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते।।१।।
भक्तार्तिनाशनपराय गणेश्वराय सर्वेश्वराय शुभदाय सुरेश्वराय।
विद्याधराय विकटाय च वामनाय भक्तप्रसन्नवरदाय नमो नमस्ते।।२।।

नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः।।
नमस्ते रुद्ररूपाय करिरूपाय ते नमः।।३।।
विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे।
भक्तप्रियाय देवाय नमस्तुभ्यं विनायक।। ४।।
लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय।।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा।।५।।

त्वां विघ्नशत्रुदलनेति च सुन्दरेति भक्तप्रियेति सुखदेति वरप्रदेति।
विद्याप्रदेत्यघहरेति च ये स्तुवन्ति तेभ्यो गणेश वरदो भव नित्यमेव।। ६।।

इति प्रार्थ्य 'अनया पूजया सिद्धिबुद्धिसहितमहागणपतिः सांगः सपरिवारः प्रीयताम् न मम।।'

<u>अथ स्वस्तिपुण्याहवाचनम्</u>- तत्रादौ स्वाग्रे पूर्वोक्तकलशस्थापनविधिना अव्रणं ताम्रकलशं संस्थाप्य तत्र वरुणं संपूज्य प्रार्थयेत्।

ऊँ नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमंगलाय।
सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते।।१।।
पाशपाणे नमस्तुभ्यं पाद्मीनीजीवनायक।
पुण्याहवाचनं यावत्तावत्त्वं सन्निधौ भव।।२।।

इति प्रार्थ्य पुण्याहवाचनं कुर्यात्। अवनिकृतजानुमण्डलः कमलमुकुलसदृशं अंजलिं शिरस्याधायानन्तरं दक्षिणेन पाणिना स्वर्णपूर्ण कलशं धारयित्वा 'दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च। ऊँ त्रीणि पदा विचक्रमे विष्णुर्गोपाऽअदाभ्यः।

अतो धर्माणि धारयन्।। तेनायु:प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्त्विवति भवन्तो ब्रुवन्तु इति यजमान:, पुण्यं पुण्याहं दीर्घमायुरस्त्विवति द्विजा:।। एवं सर्वत्र यजमान वचनोत्तरं ब्राह्मणा: प्रतिवचनं दद्यु:।। ब्राह्मणानां हस्ते - 'सुप्रोक्षितमस्तु ऊँ शिवा आप: सन्तु' इति जलं दद्यात्। 'सन्तु शिवा आप:' इति प्रतिवचनम्।। 'ऊँ सौमनस्यमस्तु' इति पुष्पम्। 'अस्तु सौमनस्यम्'०।। 'ऊँ अक्षतं चारिष्टं चास्तु' इत्यक्षतान्।। 'अस्त्वक्षतमरिष्टं च'०।। 'ऊँ गन्धा: पान्तु' इति गन्धम्। 'सौमंगल्यं चास्तु'०।। 'ऊँ अक्षता: पान्तु'-' आयुष्यमस्तु'०।। 'ऊँ पुष्पाणि पान्तु'- 'सौश्रियमस्तु'०।। 'ऊँ ताम्बूलानि पान्तु'-'ऐश्वर्यमस्तु'०।। 'ऊँ दक्षिणा: पान्तु'-' बहुधनमस्तु'०।। 'पुनरत्रा: पान्तु'-'स्वर्चितमस्त्विवति' विप्रा ब्रूयु:।। यजमान: आचार्यादीन्प्रणम्य 'श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं चायुष्यं चास्त्विवति भवन्तो ब्रुवन्तु' इति वदेत्। ते च 'श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं चायुष्यं चास्तु' इत्युक्ता 'दीर्घमायु: शान्ति: पुष्टिस्तुष्टिश्चास्त्विव'ति यजमानं मूर्ध्न्यभिषिंचेयु:।। 'यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारम्भा: शोभना: प्रवर्तन्ते तमहमोंकारमादिं कृत्वा ऋग्यजु:सामाशीर्ववचनं बहुऋषिमतं समनुज्ञातं भवद्भिरनुज्ञात: पुण्यं पुण्याहं वाचयिष्ये'। यजमान: 'ऊँ वाच्यतां' इत्युक्त्वा ब्राह्मणानां हस्तेष्वक्षतान्दद्यात्ते चाशिषो दद्यु:।

ऊँ भद्रंकर्णेभि: श्रृणुयाम देवा भद्रम्पश्येमाक्षभिर्यजत्रा।
स्थिरैरंगैस्तुष्टुवाꣳस स्तनूभिर्व्यशेमहि देवहितं यदायु:।।१।।
देवानां भद्रासुमतिर्ऋजूयतान्देवानꣳरातिरभिनो निवर्तताम्।
देवानाꣳ सख्यमुपसेदिमा वयन्देवानऽआयु: प्रतिरन्तु जीवसे।। २।।
न तद् रक्षासो न पिशाचास्तरन्ति देवानामोज: प्रथमजꣳ ह्येतत्।
यो बिभर्ति दाक्षायणꣳ हिरण्यꣳ सदेवेषु कृणुते दीर्घमायु:।।३।।
दीर्घायुस्तऽओषधे खनिता यस्मै च त्वा खनाम्यहम्।
अथो त्वन्दीर्घायुर्भूत्वा शतवल्शा विरोहतात्।।४।।
द्रविणोदा द्रविणसस्तुरस्य द्रविणोदा: सनरस्य प्रियं सत्।
द्रविणोदा वीरवती मिशन्नो द्रविणोदा रासते दीर्घमायु:।।५।।
सविता पश्चात्तत्सविता पुरस्तात्सवितोत्तरात्तात्सविताधरात्तात्।
सविता न: सुवतु सर्वतातिं सविता नो रासतान्दीर्घमायु:।।६।।
नवो नवो भवति जायमानोऽह्नान्केतुरुषसामेत्यग्रम्।
भागन्देवेभ्यो विदधात्ययं प्रचंद्रमास्ति रते दीर्घमायु:।।७।।
उच्चा दिवि दक्षिणावन्तोऽअस्थुर्येऽअश्वदा: सहते सूर्येण।
हिरण्यदाऽअमृतत्वं भजन्ते वासोदा: सोमप्रतिरन्त आयु:।।८।।

इत्याशीर्वाद:।। 'व्रतजपनियमतप:स्वाध्यायक्रतुदयादमदानविशिष्टानां सर्वेषां

ब्राह्मणानां मनः समाधियताम्' इति यजमानः।। 'समाहितमनसः स्मः' इति द्विजाः।। 'प्रसीदन्तु भवन्तः' इति यजमानो ब्रूयात्। 'प्रसन्नः स्मः' इति द्विजाः । ततो यजमानः- 'ऊँ शान्तिरस्तु' 'अस्त्वि'ति द्विजाः प्रतिवचनं सर्वत्र दद्युः। 'ऊँ पुष्टिरस्तु ऊँ तुष्टिरस्तु ऊँ वृद्धिरस्तु ऊँ अविघ्नमस्तु ऊँ आयुष्यमस्तु ऊँ आरोग्यमस्तु ऊँ शिवं कर्मास्तु ऊँ कर्मसमृद्धिरस्तु ऊँ वेदसमृद्धिरस्तु ऊँ शास्त्रसमृद्धिरस्तु ऊँ धनधान्यसमृद्धिरस्तु ऊँ पुत्रपौत्रसमृद्धिरस्तु ऊँ इष्टसंपदस्तु ऊँ अरिष्टनिरसनमस्तु तद्दूरे प्रतिहतमस्तु ऊँ यच्छ्रेयस्तदस्तु ऊँ उत्तरे कर्मणि निर्विघ्नमस्तु ऊँ उत्तरोत्तरमहरहरभिवृद्धिरस्तु ऊँ उत्तरोत्तरा क्रियाः शुभाः शोभनाः संपद्यन्ताम्। ऊँ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नसंपदस्तु।। (उदकसेकः) ऊँ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयन्ताम्। ऊँ तिथिकरणे समुहूर्ते सनक्षत्रे सग्रहे साधिदेवते प्रीयेताम्। ऊँ दुर्गापांचाल्यौ प्रीयेताम्। ऊँ अग्निपुरोगा विश्वेदेवा प्रीयन्ताम्। ऊँ इन्द्रपुरोगा मरुद्‌गणाः प्रीयन्ताम्। ऊँ माहेश्वरीपुरोगा उमामातरः प्रीयन्ताम्। ऊँ अरुन्धतीपुरोगा एकपत्न्यः प्रीयन्ताम्। ऊँ विष्णुपुरोगाः सर्वे देवा प्रीयन्ताम्। ऊँ ब्रह्मपुरोगाः सर्वे वेदाः प्रीयन्ताम्। ऊँ ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम्। ऊँ श्रीसरस्वत्यौ प्रीयेताम्। ऊँ श्रद्धामेधे प्रीयेताम्। ऊँ भगवती कात्यायनी प्रीयताम्। ऊँ भगवती माहेश्वरी प्रीयताम्। ऊँ भगवती ऋद्धिकरी प्रीयताम्। ऊँ भगवती सिद्धिकरी प्रीयताम्। ऊँ भगवती पुष्टिकरी प्रीयताम्। ऊँ भगवती तुष्टिकरी प्रीयताम्। ऊँ भगवन्तौ विघ्नविनायकौ प्रीयेताम्। ऊँ सर्वाः कुलदेवताः प्रीयन्ताम्। ऊँ सर्वा ग्रामदेवताः प्रीयन्ताम्। ऊँ हताश्च ब्रह्मद्विषः ऊँ हताश्च परिपन्थिनः ऊँ हताश्च विघ्नकर्तारः शत्रव पराभवं यान्तु। ऊँ शाम्यन्तु घोराणि। ऊँ शाम्यन्तु पापानि। ऊँ शाम्यंत्वीतयः। ऊँ शुभानि वर्द्धन्ताम्। ऊँ शिवा आपः सन्तु। ऊँ शिवा ऋतवः सन्तु। ऊँ शिवा ओषधयः सन्तु। ऊँ शिवा नद्यः सन्तु। ऊँ शिवा गिरयः सन्तु। ऊँ शिवा अतिथयः सन्तु। ऊँ शिवा अग्नयः सन्तु। ऊँ शिवा आहुतयः सन्तु। ऊँ अहोरात्रे शिवे स्याताम्। ऊँ निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो नऽओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्। ऊँ शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतु-सोमसहिता आदित्यपुरोगाः सर्वे ग्रहाः प्रीयन्ताम्। ऊँ भगवान् नारायणः प्रीयताम्। ऊँ भगवान् पर्जन्यः प्रीयताम्। ऊँ भगवान्स्वामी महासेन प्रीयताम्। ऊँ पुण्याहकालान्वाचयिष्ये - इति यजमानः। ऊँ

वाच्यताम् - इति प्रतिवचनम्। ब्राह्मयं पुण्यं महद्यच्च सृष्ट्युत्पादन कारकम्। वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः।।१।। भो ब्राह्मणाः मया क्रियमाणस्य चिन्तामणिमंत्रपुरश्चरणाख्यस्य कर्मणः पुण्याहं भवन्तो ब्रुवन्तु - इति यजमानः। ॐ पुण्याहम् - एवं प्रतिवचनं च त्रिः पठित्वा। ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः।

पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा।।१।।
पृथिव्यामुद्धृतायां तु यत्कल्याणं पुराकृतम्।
ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः।।२।।

भो ब्राह्मणाः मया क्रिय....कर्मणः कल्याणं भवन्तो ब्रुवन्तु। ॐ कल्याणम्..। यथेमां वाचं कल्याणीमावदानि जनेभ्यः ब्रह्मराजन्याभ्यार्ठं शूद्राय चार्याय च स्वाय चारणाय च।। प्रियो देवानां दक्षिणायै दातुरिह भूयासमयम्मे कामः समृध्यतामुपमादो नमतु।।१।। सागरस्य यथा वृद्धिर्महालक्ष्म्यादिभिः कृता। संपूर्णा सुप्रभावा च तां च ऋद्धिं ब्रुवन्तु नः।। भो ब्राह्मणाः मया क्रिय...... कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु। ॐ ऋद्ध्ययताम्......। ॐ सत्रस्यऽऋद्धि रस्यगन्म ज्योतिरमृताऽअभूम। दिवम्पृथिव्याऽअध्यारुहामाविदाम देवान् स्वर्ज्योतिः।।१।। स्वस्तिरस्तु या विनाशाख्या पुण्यकल्याणवृद्धिदा। विनायकप्रिया नित्यं तां च स्वस्तिं ब्रुवन्तु नः। भो ब्राह्मणाः मया ...... कर्मणः स्वस्तिं भवन्तो ब्रुवन्तु। ॐ स्वस्ति......। ॐ स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः। स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु।।१।। समुद्रमथनाज्जाता जगदानन्दकारिका। हरिप्रिया च मांगल्या तां श्रियं च ब्रुवन्तु नः।।२।। भो ब्राह्मणाः मया..... कर्मणः श्रीरस्त्विति भवन्तो ब्रुवन्तु। अस्तु श्रीः .....। ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणा मुम्मऽइषाण सर्वलोकम्मऽइषाण।।१।। अस्मिन्पुण्याहवाचने न्यूनातिरिक्तो यो विधिः स उपविष्टब्राह्मणानां वचनात् श्रीमहागणपतिप्रसादाच्च सर्वः परिपूर्णोऽस्तु। ॐ अस्तु परिपूर्ण इति विप्राः।

## अथाभिषेकः

अभिषेके पत्नी वामतः एकस्मिन् कलशे वरुणोदकं गृहीत्वाऽविधुराश्चत्वारो ब्राह्मणा दूर्वाम्रपल्लवैर्यजमानमभिषिंचेयुः। तत्र मन्त्राः- ॐ पयः पृथिव्या० १। पंचनद्यः २। वरुणस्योत्तम्० ३। पुनंतु मा० ४। देवस्य त्वा सवितुः प्रसवेऽश्विनो र्बाहुभ्याम्पूष्णो हस्ताभ्याम्। सरस्वत्यै वाचो यन्तुर्व्यन्त्रिये दधामि बृहस्पतेष्ट्वा साम्राज्येनाभिषिंचाम्यसौ।।५।। देवस्य त्वा सवितुः प्रसवेऽ श्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम्। सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेः

साम्राज्येनाभिषिंचाम्यसौ।।६।। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्भैषज्येन तेजसा ब्रह्मवर्च्चसायाभिषिंचामि ।।७।। सरस्वत्यै भैषज्येन वीर्याय अन्नाद्यायाऽभिषिंचामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभिषिंचामि।।८।। विश्वानि देवसवितर्दुरितानि परासुव यद्भद्रं तन्नऽआसुव।।९।। धामच्छादाग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः सचेतसो विश्वेदेवा यज्ञम्प्रावन्तु नः शुभे ।।१०।। त्वं यविष्टदाशुषो नॄः पाहि श्रृणुधी गिरः रक्ष तोकमुतत्मना।।११।।। अन्नपतेऽन्नस्य नो धेह्यनमीवस्य शुष्मिणः प्रप्प्रदाता-रन्तारिषऽउर्ज्जन्नो धेहि द्विपदे शं चतुष्पदे ।।१२।। ऊँ द्यौः शांतिरन्त..... ।। १३।। यतो यतः समीहसे.....।।१४।। अमृताभिषेकोऽस्तु शांतिः शांतिः शांतिः सुशांतिर्भवतु।।

ततः पुत्रवतीभिर्वृद्धसुवासिनीभिर्नीराजनं कार्यम्।।

ऊँ अनाधृष्टापुरस्तादग्नेराधिपत्यऽआयुर्मेदाः पुत्रवती दक्षिणत इन्द्रस्याधिपत्ये प्रजामेदाः विधृतिरुपरिष्टाद्बृहस्पतेराधिपत्येऽओजोमेदा विश्वाभ्यो माना ष्ट्राभ्यस्पाहि मनारश्वोसि।।१।। अनेन पुण्याहवाचनेन चिन्तामणि मंत्रजपदेवता प्रीयताम् न मम ।।

## अथ <u>मातृकापूजनम्</u>-

तत्र तावत् षड्विनायकपूजनम्। गोधूमादिधान्यपुंजेषु हिरद्रारंजितेषु <u>षड्विनायकाः</u> स्थाप्याः।। तद्यथा- मोदश्चैव प्रमोदश्च सुमुखो दुर्मुखस्तथा।। अविघ्नो विघ्नकर्ता च षडेते विघ्ननायकाः ।। १।। ऊँ मोदाय नमः, मोदमावाहयामि स्था० । ऊँ प्रमोदाय नमः, प्रमोदमा० । ऊँ सुमुखाय०। ऊँ दुर्मुखाय०। ऊँ अविघ्नाय० । ऊँ विघ्नकर्त्रे । इत्यावाह्य - 'मनोजूति र्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञठँ समिमं दधातु।। विश्वेदेवासऽइह मादयन्तामोम्प्रतिष्ठ।।' इति प्रतिष्ठाप्य 'ऊँ मोदादिषड् विनायकेभ्यो नमः' इति नाममन्त्रेण षोडशोपचारैः संपूजयेत्। अनया पूजया मोदादिषड्विनायकाः प्रीयन्ताम्, न मम। ततो <u>गौर्यादिमातृका</u> अक्षतपुंजेषु पूगीफलेषु वा निवेश्याः। तत्रायं क्रमः- गौरी पद्मा शची मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लोकमातरः।।१।। हृष्टिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवताः।। गणेशेनाधिका ह्येता वृद्धौ पूज्याश्च षोडश।। २।। ऊँ गणेशाय नमः गणेशमावाहयामि।।१।। ऊँ गौर्यै नमः गौरीमावाहयामि।।२।। ऊँ पद्मायै नमः पद्मामावाहयामि।।३।। ऊँ शच्यै नमः शचीमावाहयामि।।४।। ऊँ मेधायै नमः मेधाम्०। ५।। ऊँ सावित्र्यै० सावित्रीमा०।।६।। ऊँ विजयायै० विजयाम्० ।। ७।। ऊँ जयायै० जयाम्०।।८।। ऊँ देवसेनायै० देवसेनाम्०।।९।। ऊँ स्वधायै० स्वधाम्०।।१०।। ऊँ स्वाहायै० स्वाहाम्० ।।११।। ऊँ मातृभ्यो नमः

मातृरावा०।। १२।। ऊँ लोकमातृभ्यो० लोकमातृरावा०।। १३।। ऊँ हृष्टये० हृष्टिम्०।। १४।। ऊँ पुष्ट्यै० पुष्टिम्०।। १५।। ऊँ तुष्ट्यै० तुष्टिमा०।।१६।। ऊँ कुलदेवतायै नमः कुलदेवतामावाहयामि।। १६।। इत्यावाह्य 'ऊँ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञठ्ठँ समिमं दधातु।। विश्वेदेवासऽइह मादयन्तामोम्प्रतिष्ठ।।' इति प्रतिष्ठाप्य 'ऊँ गौर्य्यादिषोडशमातृकाभ्यो नमः' नाममन्त्रेण षोडशोपचारैः संपूजयेत्। ततः कुड्ये पीठे वा आवाहित मातृणामुपरिघृतेन कुंकमाक्तेन दक्षिणोत्तराः सप्त पंच त्रिस्रो वा धारा दद्यात्। 'ऊँ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं देवस्य त्वा सविता पुनातु।। वसोः पवित्रेण शतधारेण सुप्वाकामधुक्ष।।१।।'

<u>अथ घृतमातृकानामानि</u>- ऊँ श्रीश्चलक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा सरस्वती। मांगल्येषु प्रपूज्यन्ते सप्तैता घृतमातरः।।१।। ऊँ श्रियै नमः श्रियमावाहयामि।।१।। ऊँ लक्ष्म्यै नमः लक्ष्मीमा०।। २।। ऊँ धृत्यै० धृतिमा०।।३।। ऊँ मेधायै० मेधामा०।। ४।। ऊँ पुष्टयै० पुष्टिमा० ।। ४।। ऊँ श्रद्धायै० श्रद्धामा०।। ६।। ऊँ सरस्वत्यै नमः सरस्वतीम०।।६।। इत्यावाह्य 'ऊँ घृतमातृकाभ्यो नमः' इति षोडशोपचारैः पूजयेत्। <u>अथ स्थलमातरः</u>- तत्रैव तण्डुलपुंजेषु- ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा। वाराही च तथेन्द्राणी चामुण्डा सप्त मातरः।। ऊँ ब्राह्म्यै नमः ब्राह्मीमावाहयामि।।१।। ऊँ माहेश्वर्यै० माहेश्वरीमा०।।२।। ऊँ कौमार्यै० कौमारीमा० ।। ३।। ऊँ वैष्णव्यै० वैष्णवीमा० ।। ४।। ऊँ वाराह्यै० वाराहीमा० ।।५।। ऊँ इन्द्राण्यै० इन्द्राणीमा० ।। ६।। ऊँ चामुण्डायै नमः चामुण्डामावाहयामि ।।७।। इत्यावाह्य 'ऊँ ब्राह्म्यादि सप्तमातृकाभ्यो नमः' इति नाममन्त्रेण षोडशोपचारैः पूजयेत्।। ततः वसोर्धारापूजनं कुर्यात्।

<u>अथायुष्यमन्त्रजपः</u>-

ऊँ आयुष्यं वर्चस्यठ्ठँ रायस्पोषमौद्भिदम्। इदठ्ठँ हिरण्यम्वर्चस्व जैत्रायाविशतादुमाम्।। १।। न तद्रक्षासो न पिशाचास्तरन्ति देवानामोजः प्रथमजठ्ठँ ह्येतत्। यो बिभर्तिदाक्षायणठ्ठँ हिरण्यठ्ठँ स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः।। २।। यदाबध्नन्दाक्षायणा हिरण्यठ्ठँ शतानीकाय सुमनस्यमानाः। तन्मऽआबध्ना मिशत शारदायायुष्मान् जरदष्टिर्यथासम्।।३।।

<u>अथ सांकल्पिकनान्दीश्राद्धप्रयोगः</u> -

तत्रादौ आचम्य प्राणानायम्य देशकालौ संकीर्त्य 'अद्य चिन्तामणिमन्त्रपुरश्चरण कर्मांगत्वेन सांकल्पिक विधिना ब्राह्मणयुग्मभोजनपर्याप्तान्ननिष्क्रयीभूत यथाशक्ति हिरण्येन नान्दीश्राद्धं करिष्ये' - इति संकल्पः। ततः पाद्यदानम्- सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ऊँ भूर्भुवःस्वः इदं वः पाद्यं पादप्रक्षालनं स्वाहा संपद्यतां वृद्धिः।।१।। अमुकगोत्रा मातृतिपामहिप्रपिता मह्यः नांदीमुख्यः ऊँ भुर्भूवःस्वः इदं वः पाद्यं पादप्रक्षालनं स्वाहा संपद्यतां वृद्धिः।। २।। अमुकगोत्राः पितृपितामहप्रपितामहाः नान्दीमुखा ऊँ भूर्भुवःस्वः इदं वः पाद्यं पादप्रक्षालनं स्वाहा संपद्यतां वृद्धिः।।३।। मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नांदीमुखाः ऊँ भूर्भुवःस्वः इदं वः पाद्यं पादप्रक्षालनं स्वाहा संपद्यतां वृद्धिः।।४।। अथासनदानम्- सत्यवसुसंज्ञकानां विश्वेषां देवानां नान्दीमुखानाम् ऊँ भूर्भुवःस्वः इदमासनं सुखासनं स्वाहा नमः संपद्यतां वृद्धिः नांदीश्राद्धे क्षणौ क्रियेताम्। ऊँ तथा प्राप्नुतां भवन्तौ प्राप्नुवावः।।१।। अमुकगोत्राणां मातृपितामहीप्रपितामहीनां नान्दीमुखीनाम् ऊँ भूर्भुवःस्वः इदमासनं सुखासनं स्वाहा नमः संपद्यतां वृद्धिः नान्दीश्राद्धे क्षणौ क्रियेताम्। ऊँ तथा प्राप्नुतां भवन्तौ प्राप्नुवावः।। २।। अमुकगोत्राणां पितृपितामहप्रपितामहानां नान्दी०..... सुखासनं स्वाहा नमः संपद्यतां वृद्धिः।।३।। द्वितीयगोत्राणां मातामहप्रमातामहवृद्धप्रमाता महानां सपत्नीकानां नान्दीमुखानाम् ऊँ भूर्भुवः स्वः इदंमासनं सुखासनं स्वाहा संपद्यतां वृद्धिः नान्दीश्राद्धे क्षणौ क्रियेताम्। ऊँ तथा प्राप्नुतां भवन्तौ प्राप्नुवावः।। ४।। ततो गन्धादिदानम्।। सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नान्दीमुख्येभ्यः इदं गन्धाद्यर्चनं स्वाहा संपद्यतां वृद्धिः।।१।। अमुकगोत्रेभ्यो मातृपितामहीप्रपितामहीभ्यो नान्दीमुखीभ्यः इदं गन्धाद्यर्चनं स्वाहा संपद्यतां वृद्धिः।। २।। अमुकगोत्रेभ्यः पितृपितामहप्रपितामहेभ्यो नांदीमुखेभ्यः इदं गंधाद्यर्चनम् स्वाहा संपद्यतां वृद्धिः।। ३।। द्वितीयगोत्रेभ्यो मातामहप्रमाता महवृद्धप्रमातामहेभ्यः सपत्नीकेभ्यो नान्दीमुखेभ्य इदं गन्धाद्यर्चनं स्वाहा संपद्यतां वृद्धिः।। ४।। ततो भोजननिष्क्रयद्रव्यदानम्- सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नान्दीमुखेभ्यो ब्राह्मणयुग्मभोजनपर्याप्तमन्नं तन्निष्क्रयीभूतं किंचिद्धिरण्यं दत्तममृतरूपेण स्वाहा संपद्यतां वृद्धिः।।१।। अमुकगोत्राभ्यो मातृपितामहीप्रपितामहीभ्यो नान्दीमुखीभ्यो ब्राह्मणयुग्म..........।।२।। अमुक गोत्रेभ्यः पितृपितामहप्रपितामहेभ्यो नान्दीमुख्येभ्यो ब्राह्मणयुग्मभोजनपर्याप्त मन्नं तन्निष्क्रयी...........।।३।। द्वितीयगोत्रेभ्यो मातामहप्रमातामहवृद्धप्रमाता महेभ्यः सपत्नीकेभ्यो नान्दीमुख्येभ्यो ब्राह्मणयुग्म...........।।४।। ततः सक्षीरमुदकदानम्- सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः प्रीयन्ताम्।

अमुकगोत्रा: मातृपितामहीप्रपितामह्य: नान्दी०..... । अमुकगोत्रा: पितृपिता महीप्रपितामह्य: नान्दी०.....। अमुकगोत्रा: पितृपितामहप्रपितामहा: नान्दी०...। द्वितीयगोत्रा: मातामहप्रमातामहवृद्धप्रमातामहा: सपत्नीका: नान्दी०.....। अथाशिषो ग्रहणम्। गोत्रं नो वर्द्धताम्। (वर्द्धतां वो गोत्रम्) दातारो नोऽभिवर्धन्ताम्। (अभिवर्धन्तां वो दातार:) वेदाश्च नोऽभिवर्धन्ताम् (वर्धन्तां वो वेदा:) संततिर्नो वर्द्धताम् (वर्द्धतां व: संतति:) श्रद्धा च नो माव्यगमत् (माव्यगमद्व: श्रद्धा) बहु देयं च नोऽस्तु (अस्तु वा बह्वन्नम्) अतिथींश्च लभामहे (लभन्तां वोऽतिथय:) याचितारश्च न: सन्तु (सन्तु वो याचितार:) एता आशिष: सत्या: सन्तु (सन्त्वेता: सत्याशिष:)।। ततो दक्षिणादानम्- सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो नान्दीमुख्येभ्य: कृतस्य नान्दी श्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयव मूलनिष्क्रयीभूतां दक्षिणां दातुमहमुत्सृजे संपद्यतां वृद्धि:।।१। अमुकगोत्राभ्यो मातृपितामही प्रपितामहीभ्यो नान्दीमुखीभ्य: कृतस्य नान्दी..........।।२।। अमुक गोत्रेभ्य: पितृपितामहप्रपितामहेभ्यो नान्दीमुख्येभ्य: कृतस्य नान्दी...........।।३।। द्वितीयगोत्रेभ्यो मातामहप्रमातामहवृद्धप्रमातामहेभ्य: सपत्नीकेभ्यो नान्दी मुख्येभ्य: कृतस्य नान्दी.....।। ४।। किमनेन नान्दीश्राद्धं संपन्नं, निश्चितं सुसंपन्नमिति पठित्वा - ॐ वाजे वाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञा:। अस्य मध्व: पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानै:।। १।। ॐ आ मा वाजस्य प्रसवो जगम्यो मे द्यावापृथिवी विश्वरूपे। आ मा गन्तां पितरा मातरा चा मा सोमोऽमृतत्वेन गम्यात्।।२।। इति मन्त्रद्वयेन विसर्जयेत्।। ॐ विश्वेदेवा: प्रीयन्ताम् न मम। मया आचरितेऽस्मिन्नान्दीश्राद्धे न्यूनातिरिक्तो यो विधि: स उपविष्टब्राह्मणानां वचनात् नान्दीमुख प्रसादात्सर्व: परिपूर्णाऽस्तु।। (अस्तुपरिपूर्ण:)।।

द्वारपूजादि:-

तद्यथा- ताम्राद्यार्घ्यपात्रं गृहीत्वा 'ॐ ह्र: द्वारार्घ्यं साधयामी'त्युक्त्वा। 'ॐ फट्' इति पात्रं प्रक्षाल्य। 'ॐ नम:' इति जलेनापूर्य। 'ॐ गंगे च यमुने चैव गोदावरि सरस्वती। नर्मदे सिन्धुकावेरि जलेऽस्मिन्सन्निधिं कुरु।।१।।' इति तीर्थान्यावाह्य। 'ॐ' इति प्रणवेन गन्धपुष्पे निक्षिप्य धेनुमुद्रां प्रदर्श्य। मूलमन्त्रेणाभिमन्त्रयेत्। एवं सामान्यार्घ्यं संपाद्य। 'ॐ अस्त्राय फट्' इत्यभिमन्त्रित जलेन द्वारं संप्रोक्ष्य। ऊर्ध्वशाखायाम् ॐ गं गणपतये नम:। तद्दक्षिणे भागे ॐ महालक्ष्म्यै नम:। वामभागे ॐ सरस्वत्यै नम:। दक्षिणशाखायाम्- ॐ विघ्नेशाय नम:। तद्दक्षिणे भागे ॐ गंगायै नम:। वामभागे ॐ यमुनायै नम:। वामशाखायाम्- ॐ क्षेत्रपालाय नम: । तद्दक्षिणे भागे ॐ स्व:सिन्धवे नम:।

वामभागे ऊँ यमुनायै नमः । पुनर्दक्षिणशाखायाम्- ऊँ धात्रे नमः।। १।। वामशाखायाम् - ऊँ विधात्रे नमः।।२।। पुनर्दक्षिणशाखायाम्- ऊँ शंखनिधये नमः।।१।। वामशाखायाम्- ऊँ अस्त्राय नमः।। १।। इति गन्धादिभिरभ्यर्च्य तत्तद्‌वताद्वारपालान् पूजयेत्। अथ विष्णुद्वारपालान् पूजयेत्- ऊँ नन्दाय नमः।।१।। ऊँ सुनन्दाय नमः।।२।। ऊँ चण्डाय नमः।।३।। ऊँ प्रचण्डाय नमः।।४।। ऊँ बलाय नमः।।५।। ऊँ प्रबलाय नमः।।६।। ऊँ भद्राय नमः।।७।। ऊँ सुभद्राय नमः।।८।। शिवद्वारपालान् पूजयेत्- ऊँ नन्दिने नमः।।१।। ऊँ महाकालाय नमः।।२।। ऊँ गणेशाय नमः।।३।। ऊँ वृषभाय नमः।।४।। ऊँ भृंगिणे नमः।।५।। ऊँ रिटये नमः।।६।। ऊँ स्कन्दाय नमः।।७।। ऊँ चण्डेश्वराय नमः।।८।। गणेशद्वारपालान् पूजयेत्- ऊँ वक्रतुण्डाय नमः।। ऊँ एकदंष्ट्राय नमः।।२।। ऊँ महोदराय नमः।।३।। ऊँ गजाननाय नमः।।४।। ऊँ लम्बोदराय नमः।।५।। ऊँ विकटाय नमः।।६।। ऊँ विघ्नराजाय नमः।।७।। ऊँ धूम्रवर्णाय नमः।।८।। शक्तिद्वारपालान् पूजयेत्- ऊँ ब्राह्म्यै नमः।।१।। ऊँ माहेश्वर्यै नमः।।२।। ऊँ कौमार्यै नमः।।३।। ऊँ वैष्णव्यै नमः।।४।। ऊँ वाराह्यै नमः।।५।। ऊँ इन्द्राण्यै नमः।।६।। ऊँ चामुण्डायै नमः।।७।। ऊँ महालक्ष्म्यै नमः।।८।। ततः पूर्वादिदिग्देवताः क्रमेण पूजयेत्:- पूर्वस्यां- ऊँ इन्द्राय नमः।।१।। आग्नेय्याम्- ऊँ अग्नये नमः।।२।। याम्याम्- ऊँ यमाय नमः।।३।। नैर्ऋत्याम्- ऊँ निर्ऋतये नमः।।४।। पश्चिमायाम्- ऊँ वरुणाय नमः।।५।। वायव्याम्- ऊँ वायवे नमः।।६।। उत्तरस्याम्- ऊँ कुबेराय नमः।।७।। ईशान्याम्- ऊँ ईशानाय नमः।।८।। एवं द्वारपूजां विधाय। आत्मानं शंकरं ध्यात्वा ''ऊँ शिवाज्ञया इतोऽन्यत्र व्रजन्तु सर्व एव हि।'' इति मन्त्रं मूलमन्त्रं च पठन् दिव्यदृष्ट्यवलोकनेन दिव्यान्विघ्नान्निवार्य 'ऊँ फट्' इति मन्त्रेणाऽर्घ्यपानीयैः प्रोक्षणेनान्तरिक्षस्थानुत्पार्य तेनैव मन्त्रेण भूमौ वामपादपार्ष्णिघातेन धरा गतान्विघ्नानुत्सारयेत्।। ततः 'ऊँ अपसर्पन्तु ते भूता ये भूता भूमि संस्थिताः। ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया।।१।। अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामविरोधेन ब्रह्मकर्म समारभे।।२ ।। इति मन्त्रद्वयेन सर्वान् विघ्नान् निवार्य्य नवयोगिनीं स्थापयेत्। तद्यथा- चित्रे दर्शित १,२,...आदि क्रमेण आवाहनादिपूर्वकं स्थाप्य पूजनीयं। ऊँ आं प्रभायै नमः, प्रभामावाहयामि स्थापयामि पूजयामि। (९ दीपकेष्वेव ९ योगिनीनां स्थापनं कृत्वा पंचोपचारैः सर्वत्र पूजा कार्या)। ऊँ ईं मायायै नमः, मायामावा० स्था० पू०। ऊँ ऊं जयायै नमः , जयामावा० स्था० पू०। ऊँ एं सूक्ष्मायै नमः , सूक्ष्मामावा० स्था० पू०। ऊँ ऐं विशुद्धायै नमः , विशुद्धामावा० स्था० पू०। ऊँ ओं नन्दिन्यै नमः , नन्दिनीमावा० स्था० पू०। ऊँ औं सुप्रभायै नमः ,

सुप्रभामावा० स्था० पू०। ऊँ अं विजयायै नमः , विजयामावा० स्था० पू०। ऊँ अः सर्वसिद्धिदायै नमः, सर्वसिद्धिदामावा० स्था० पू०। ततः सिंह स्थापना - ऊँ नमो भगवते वज्रनखदंष्ट्रायुधाय महासिंहाय हुं फट् नमः, सिहमावा० स्था० पू०। एवमगेव ब्रह्माविष्णुशिवाः स्थाप्याः ततः पीठपूजाऽग्न्युत्तारण प्राणप्रतिष्ठाकार्यं च कृत्वा (भुवनेश्वरी रहस्ये पृ ६६-७१) अवकाशप्रदानाय शनैः स्वांगं संकोचयन् वामशाखां स्पृशन् दक्षिणपादेन प्रविशेत्। एवं पूजामण्डपं प्रविश्य स्वेष्टदेवं संस्मृत्य घण्टानादं कृत्वा वाससा द्वारमाच्छाद्य पंचगव्यार्घतोयाभ्याम्- 'ऊँ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा । यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः।।' इति मन्त्रेण मण्डपान्तरं प्रोक्ष्य। ईशान्याम्- ऊँ ब्रह्मणे नमः । ऊँ वास्तुपुरुषाय नमः। ऊँ क्षेत्रपालाय नमः।। इति ब्रह्मवास्तुपुरुष क्षेत्रपालान् संपूज्य 'ऊँ तीक्ष्णदंष्ट्र महाकाय कल्पान्त दहनोपमम्। भैरवाय नमस्तुभ्यमनुज्ञां देहि मे प्रभो' इति भैरवं प्रार्थयेत्।। <u>अथासनादिविधानम्</u>- तत्र तावत् आसनभूमौ कूर्मशोधनं कार्यम्। तद्यथा- जपस्थानभूमिं नवधा कृत्वा पूर्वादिसप्तकोष्ठेषु क्रमेण कवर्ग-१ चवर्ग-२ टवर्ग-३ तवर्ग-४ पवर्ग-५ यवर्ग-६ शवर्गान्-७ लिखित्वा ईशान्यामष्टमे कोष्ठे 'ल' 'क्ष' इति द्वौ वर्णौ विलिख्य मध्यकोष्ठमपि नवधा विभज्य तत्र पूर्वादिषु अष्टदिक्षु अकारादिस्वरद्वयं क्रमेण लिखेत्।। यत्र कोष्ठे क्षेत्रस्य वा ग्रामस्य साधकस्य वा नामादिवर्णो भवेत् तदेव कूर्ममुखं जपसिद्धिं भवति। तत्रैव दीपस्थापनं कुर्य्यात्।। यत्र जपकर्ता एक एव तदा कूर्ममुखे उपविश्य तत्रैव दीपस्थापनं कृत्वा जपं च कुर्यात्। यत्र ब्राह्मणा जापकास्तत्र कूर्ममुखोपरि दीपमेव स्थापयेत् स्थानाभावात्।। एवं कूर्मशोधनं दीपस्थानशोधनं च विधाय आसनाद्यर्थं जलादिना त्रिकोणं कृत्वा तत्र 'ऊँ कूर्माय नमः। ऊँ ह्रीं आधारशक्तिकमलासनाय नमः। ऊँ पृथिव्यै नमः।' इति गन्धाक्षतपुष्पैः संपूज्य तदुपर्यनुद्विग्नकरं कुशासनम् १ तदुपरि मृगाजिनम् २ तदुपरि कम्बलाद्यासनम् ३ आस्तीर्य स्थापितानां त्रयाणामासनानामुपरि क्रमेण 'ऊँ अनन्तासनाय नमः। ऊँ विमलासनाय नमः। ऊँ पद्मासनाय नमः।' इति मन्त्रत्रयेण त्रीन् दर्भान् प्रत्येकं निदध्यात् (काष्ठदिनिषिद्धासनानि वर्जयेत्) एवमासनं संस्थाप्य तत्र प्राङ्मुख उदङ्मुखो वा उपविश्य स्वस्तिकासनपद्मासनवीरासनेष्वन्यतममासनं कुर्यात्।। तत्रासनमन्त्रं- 'पृथ्वीति मन्त्रस्य मेरुपृष्ठऋषिः। कूर्मो देवता। सुतलं छन्दः। आसने विनियोगः।। ऊँ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता।। त्वं च धारय मां देवि पवित्रं कुरु चासनम्।।१।।' ततो मूलमन्त्रेण शिखां बद्ध्वा आचम्य ततः पाद्यार्घ्याचमनीयमधुपर्कस्नानार्थं पंचपात्राणि पुष्पादींश्च दक्षिणपार्श्वे संस्थाप्य जलपात्रं व्यजनं छत्रादर्शचामराणि च वामे स्थापयेत्। ततः करद्वये अनामिकामूलयोः कुशपवित्रद्वयं स्वर्णपवित्रद्वयं वा परिधाय स्मार्तविधिना त्रिराचम्य। प्राणानायम्य देशकालौ संकीर्त्य 'ममात्मनः श्रुतिस्मृतिपुराणोक्त फलप्राप्त्यर्थममुककामनासिद्ध्यर्थम् भुवनेश्वरीदेवता प्रीतये चिन्तामणिमन्त्र

पुरश्चरणान्तर्गत चिन्तामणिमंत्रजपं करिष्ये तदंगत्वेन भूतशुद्धिप्राण प्रतिष्ठाऽन्तर्मातृकाबहिर्मातृकान्यासांश्च करिष्ये' इति संकल्प्य। ऋत्विग्भिस्तु देशकालसंकीर्तनान्ते 'यजमानेन वृतोऽहं करिष्यामि' इति प्रत्येकं संकल्पः। ततः कृतांजलिपुटः भूतशुद्ध्यादिकर्म कुर्यात्। तद्यथा- 'ॐ सूर्यः सोमो यमः कालः संध्या भूतानि पंच च। एते शुभाऽशुभस्येह कर्मणो मम साक्षिणः।।१।। भो देव प्राकृतं चित्तं पापाक्रान्तमभून्मम।। तन्निस्सारय चित्तान्मे पापं तेऽस्तु नमो नमः।२।।' इति प्रार्थ्य वामभागे 'ॐ गुरुभ्यो नमः। दक्षिणे ॐ गणेशाय नमः।' इति नत्वा करयोः 'ॐ अस्त्राय फट्' इत्यस्त्रं न्यस्य तदुपरि तालत्रयं कृत्वा अंगुष्ठतर्जनीभ्यां शब्दं कुर्वन् 'ॐ नमः सुदर्शनाय अस्त्रराजाय फट्' इति मन्त्रेण दिग्बन्धनं कृत्वा वह्निप्रकारत्रयं विभाव्य मूलेनाचम्य प्राणानायम्य भूतशुद्धिं कुर्यात्। अथ <u>भूतशुद्धिप्रकार</u>:- कुम्भकप्राणायामेन मूलाधारात् ब्रह्मरंध्रगतां स्मृत्वा हृदयस्थं जीवं प्रदीपकलिकाकारं गृहीत्वा सुषुम्नामार्गेण ब्रह्मरंध्रं गत्वा 'ॐ हंसः सोऽहमिति' मंत्रेण जीवं ब्रह्मणि संयोजयेत्। ततः पादादिजानुपर्यन्तं चतुष्कोणं वज्रलांछितं स्वर्णवर्णं पृथ्वीमण्डलम् 'लँ' इति भूबीजाढ्यं स्मरेत्।।१।। जान्वादि नाभिपर्यन्तम् अर्द्धचन्द्राकारं पद्मद्वयांकितं श्वेतवर्णम् अपां स्थानं सोममण्डलम् 'वं' इति वरुणबीजाढ्यं स्मरेत्।।१।। नाभ्यादि हृदयपर्यन्तं त्रिकोणं स्वस्तिकांकितं रक्तवर्णम् अग्निमण्डलं 'रं' इति वह्निबीजाढ्यं स्मरेत्।।३।। हृदयादिभ्रूमध्यपर्यन्तं वृत्तं षड् बिन्दुलांछितं धूम्राभं वायुमण्डलम् 'यं' वायुबीजाढ्यं स्मरेत्।।४।। भ्रूमध्यादारभ्य ब्रह्मरन्ध्रान्तं वृत्तं स्वच्छं मनोहरमाकाशमण्डलं 'हं' व्योमबीजाढ्यं स्मरेत्।।४।।

<u>मातृकान्यासदि</u>:-

तत्र <u>तावदन्तर्मातृकान्यास</u>:- ॐ अस्य श्रयन्तर्मातृकान्यासमन्त्रस्य प्रजापति ऋषिः। गायत्री छन्दः। सरस्वती देवता। हलो बीजानि। स्वराः शक्तयः। क्षं कीलकम् । अखिलफलाप्तये न्यासे विनियोगः। अथ <u>ऋष्यादिन्यास</u>:- ॐ अं प्रजापतिऋषये नमः आं -शिरसि। ॐ इं गायत्रीछन्दसे नमः ईं -मुखे। ॐ उं सरस्वतीदेवतायै नमः ऊं -हृदये। ॐ एं हल्भ्यो बीजेभ्यो नमः ऐं -गुह्ये। ॐ ओं स्वरशक्तिभ्यो नमः औं -पादयोः। ॐ अं क्षं कीलकाय नमः -नाभौ। ॐ अः अखिलफलाप्तये न्यासे विनियोगाय नमः -सर्वांगेषु ।

अथ <u>करन्यास</u>:- ॐ अं कँ खँ गँ घँ ङँ आं अगुंष्ठाभ्यां नमः।
ॐ इं चँ छँ जँ झँ ञँ ईं तर्जनीभ्यां नमः।
ॐ उं टँ ठँ डँ ढँ णँ ऊं मध्यमाभ्यां नमः।
ॐ एं तँ थँ दँ धँ नँ ऐं अनामिकाभ्यां नमः।
ॐ ओं पँ फँ बँ भँ मँ औं कनिष्ठाकाभ्यां नमः।

ऊँ अं यँ रँ लँ वँ शँ षँ सँ हँ क्षँ अः करतलकरपृष्ठाभ्यां नमः।

अथ हृदयादिषडंगन्यासः-

ऊँ अं कँ खँ गँ घँ ङँ आं हृदयाय नमः।
ऊँ इं चँ छँ जँ झँ ञँ ईं शिरसे स्वाहा।
ऊँ उं टँ ठँ डँ ढँ णँ ऊं शिखायै वषट्।
ऊँ एं तँ थँ दँ धँ नँ ऐं कवचाय हुम्।
ऊँ ओं पँ फँ बँ भँ मँ औं नेत्रत्रयाय वौषट्।
ऊँ अं यँ रँ लँ वँ शँ षँ सँ हँ क्षँ अः अस्त्राय फट्।

ततः पूरकप्राणायामे कण्ठस्थषोडशदलपद्मे - ऊँ अं नमः, आं नमः, इं नमः, ईं नमः, उं नमः, ऊं नमः, ऋं नमः, ॠं नमः, ऌं नमः, ॡं नमः, एं नमः, ऐं नमः, ओं नमः, औं नमः, अं नमः, अः नमः- इति षोडशस्वरान्न्यसेत्।। ततः कुम्भकप्राणायामे हृदयस्थे द्वादशदले - ऊँ कँ नमः। खँ नमः। गँ नमः। घँ नमः। ङँ नमः। चँ नमः। छँ नमः। जँ नमः। झँ नमः। ञँ नमः। टँ नमः। ठँ नमः। इति द्वादशवर्णान्न्यसेत्।। नाभौ दशदले - ऊँ डँ नमः। ढँ नमः। णँ नमः। तँ नमः। थँ नमः। दँ नमः। धँ नमः। नँ नमः। पँ नमः। फँ नमः। इति दशवर्णान्न्यसेत्।। तदधो लिंगे षड्दले - ऊँ बँ नमः। भँ नमः। मँ नमः। यँ नमः। रँ नमः। लँ नमः। इति षड्वर्णान्न्यसेत्। आधारे गुदे चतुर्दले - ऊँ वँ नमः। शँ नमः। षँ नमः। सँ नमः। इति चतुर्वर्णान्न्यसेत्। ततः रेचके भ्रूमध्ये द्विदले हँ नमः। क्षँ नमः। इति द्वौ वर्णौ विन्यसेत्।। अथ ध्यानम्:-

आधारे लिंगनाभौ प्रकटितहृदये, तालुमूले ललाटे।
द्वे पत्रे षोडशारे द्विदशदशदले, द्वादशार्द्धे चतुष्के।।
वासान्ते वालमध्ये डफकठ सहिते, कण्ठदेशे स्वराणां।
हंक्षं तत्त्वार्थयुक्तं सकलदलगतं, वर्णरूपं नमामि।।१।।

अथ बहिर्मातृकान्यासः- ऋष्यादिषडंगन्यासाः पूववर्त्।

ऊँ अं नमः शिरसि। ऊँ आं नमः मुखे। ऊँ इं नमः दक्षिणनेत्रे। ऊँ ईं नमः वामनेत्रे। ऊँ उं नमः दक्षिणकर्णे। ऊँ ऊं नमः वामकर्णे। ऊँ ऋं नमः दक्षिणनासापुटे। ऊँ ॠं नमः वामनासापुटे। ऊँ ऌँ नमः दक्षिणकपोले। ऊँ ॡं नमः वामकपोले। ऊँ एं नमः ऊर्ध्वोष्ठे। ऊँ ऐं नमः अधरोष्ठे। ऊँ ओं नमः ऊर्ध्वदन्तपंक्तौ। ऊँ औं नमः अधोदन्त पंक्तौ। ऊँ अं नमः मूर्ध्नि। ऊँ अः नमः मुखवृत्ते । ऊँ कं नमः दक्षिणबाहुमूले। ऊँ खं नमः दक्षिणकर्पूरे। ऊँ गं नमः दक्षिणमणिबन्धे। ऊँ घं नमः दक्षिणांगुलिमूले। ऊँ ङं नमः दक्षिणांगुल्यग्रे। ऊँ चं नमः

वामबाहुमूले। ऊँ छं नमः वामकूर्परे। ऊँ जं नमः वाममणिबन्धे। ऊँ झं नमः वामांगुलिमूले। ऊँ ञं नमः वामांगुल्यग्रे। ऊँ टं नमः दक्षिण पादमूले। ऊँ ठं नमः दक्षिणजानुनि। ऊँ डं नमः दक्षिणगुल्फे। ऊँ ढं नमः दक्षपदांगुलिमूले। ऊँ णं नमः दक्षपादांगुल्यग्रे। ऊँ तं नमः वामपद मूले। ऊँ थं नमः वामजानुनि। ऊँ दं नमः वामगुल्फे। ऊँ धं नमः वामपदांगुलिमूले। ऊँ नं नमः वामपादांगुल्यग्रे। ऊँ पं नमः दक्षपार्श्वे। ऊँ फं नमः वामपर्श्वे। ऊँ बं नमः पृष्ठे। ऊँ भं नमः नाभौ। ऊँ मं नमः उदरे। ऊँ यं त्वगात्मने नमः हृदये। ऊँ रं असृगात्मने नमः दक्षांसे। ऊँ लं मांसात्मने नमः ककुदि। ऊँ वं मेदात्मने नमः वामांसे। ऊँ शं अस्थ्यात्मने नमः हृदयादिदक्षहस्तान्तम्। ऊँ षं मज्जात्मने नमः हृदयादिवामहस्तान्तम्। ऊँ सं शुक्रात्मने नमः हृदयादि दक्षवामपादान्तम्। ऊँ हं जीवात्मने नमः जठरे। ऊँ क्षं परमात्मने नमः मुखे। एवं बहिर्मातृकान्यासं कृत्वा ध्यायेत्।

"पंचाशल्लिपिभिर्विभक्तमुखदोर्हृत्पद्मवक्षःस्थलां,
भास्वन्मौलिनिबद्धचन्द्रशकलमापीनतुंगस्तनीम्।
मुद्रामक्षगुणं सुधाढ्यकलशं विद्यां च हस्ताम्बुजै
र्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये।।१।।"

एवं मातृकान्यासं कृत्वा तत्तदेवताकलान्यासं कुर्यात्। तद्यथा- अस्य शारदा कलामातृकान्यासस्य प्रजापति ऋषिर्गायत्री छन्दः श्रीमातृकाशारदादेवता हलो बीजानि स्वराः शक्तयः चिन्तामणिमन्त्रपुरश्चरणांगत्वेन कला मातृकान्यासे विनियोगः। ऋष्यादिन्यासः- ऊँ प्रजापतिऋषये नमः शिरसि। ऊँ गायत्रीछन्दसे नमः मुखे। ऊँ शारदादेवतायै नमः हृदये। ऊँ हल्भ्यो बीजेभ्यो नमः गुह्ये। ऊँ स्वरेभ्यः शक्तिभ्यो नमः पादयोः। ऊँ चिन्तामणिमन्त्रपुरश्चरणांगत्वेन कलामातृकान्यासे विनियोगाय नमः सर्वांगे। अथ हृदयादिन्यासः- ऊँ अं ऊँ आं हृदयाय नमः। ऊँ इं ऊँ ईं शिरसे स्वाहा। ऊँ उं ऊँ ऊं शिखायै वषट्। ऊँ एं ऊँ ऐं कवचाय हुं। ऊँ ओं ऊँ औं नेत्रत्रयाय वोषट्। ऊँ अं ऊँ अः अस्त्राय फट्। अथ ध्यानम्-

ऊँ शंकचक्राब्जपरशुकपालानक्षमालिकाः।
पुस्तकाः मृतकुम्भौ च त्रिशूल दधतीं करैः।
ऊँ सितपीतासितश्वेतरक्तवर्णैस्त्रिलोचनैः।
पंचास्यसंयुतां चन्द्रसकांतिं शारदां भजे।।१।।

इति ध्यात्वा शारदाकलामातृकां न्यसेत्। तद्यथा- ऊँ ह्रीं अं निवृत्त्यै नमः ललाटे। ऊँ ह्रीं आं प्रतिष्ठायै नमः मुखवृत्ते। ऊँ ह्रीं इं विद्यायै नमः

दक्षनेत्रे। ऊँ ह्रीं ईं शान्त्यै नमः वामनेत्रे। ऊँ ह्रीं उं इन्धिकायै नमः दक्षकर्णे। ऊँ ह्रीं ऊं दीपिकायै नमः वामकर्णे। ऊँ ह्रीं ऋं रेचिकायै नमः दक्षनासापुटे। ऊँ ह्रीं ॠं मोचिकायै नमः वामनासापुटे। ऊँ ह्रीं लृं परायै नमः दक्षकपोले। ऊँ ह्रीं ॡं सूक्ष्मायै नमः वामकपोले। ऊँ ह्रीं एं सूक्ष्मामृतायै नमः ऊर्ध्वोष्ठे। ऊँ ह्रीं ऐं ज्ञानामृतायै नमः अधरोष्ठे। ऊँ ह्रीं ओं आप्यायन्यै नमः ऊर्ध्वदंतपंक्तौ। ऊँ ह्रीं औं व्यापिन्यै नमः अधोदंतपंक्तौ। ऊँ ह्रीं अं व्योमरूपायै नमः जिह्वायाम्। ऊँ ह्रीं अः अनंतायै नमः कण्ठे। ऊँ ह्रीं कं सुदृढायै नमः दक्षबाहूमूले। ऊँ ह्रीं खं नह्यै नमः दक्षकूर्परे। ऊँ ह्रीं गं स्मृत्यै नमः दक्षमणिबंधे। ऊँ ह्रीं घं मेधायै नमः दक्षहस्तांगुलिमूले। ऊँ ह्रीं ङं कान्त्यै नमः दक्षहस्तांगुल्यग्रे। ऊँ ह्रीं चं लक्ष्म्यै नमः वामबाहुमूले। ऊँ ह्रीं छं घुत्यै नमः वामकूर्परे। ऊँ ह्रीं जं स्थिरायै नमः वाममणिबंधे। ऊँ ह्रीं झं स्थित्यै नमः वामहस्तांगुलिमूले। ऊँ ह्रीं जँ सिद्धयै नमः वामहस्तांगुल्यग्रे। ऊँ ह्रीं टं जरायै नमः दक्षिणपादमूले। ऊँ ह्रीं ठं पालिन्यै नमः दक्षजानुनि। ऊँ ह्रीं डं क्षांत्यै नमः दक्षगुल्फे। ऊँ ह्रीं ढं ईश्वर्यै नमः दक्षपादांगुलिमूले। ऊँ ह्रीं णं रत्यै नमः दक्षपादांगुल्यग्रे। ऊँ ह्रीं तं कामिकायै नमः वामपादमूले। ऊँ ह्रीं थं वरदायै नमः वामजानुनि। ऊँ ह्रीं दं आह्लादिन्यै नमः वामगुल्फे। ऊँ ह्रीं धं प्रीत्यै नमः वाम पादांगुलिमूले। ऊँ ह्रीं नं दीर्घायै नमः वामपादांगुल्यग्रे। ऊँ ह्रीं पं तीक्ष्णायै नमः वामपार्श्वे। ऊँ ह्रीं बं भयायै नमः पृष्ठे। ऊँ ह्रीं भं निद्रायै नमः नाभौ। ऊँ ह्रीं मं तंद्रिकायै नमः जठरे। ऊँ ह्रीं यं क्षुधायै नमः हृदये। ऊँ ह्रीं रं क्रोधिन्यै नमः दक्षांसे। ऊँ ह्रीं लं क्रियायै नमः ककुदि। ऊँ ह्रीं वं उत्कार्यै नमः वामांसे। ऊँ ह्रीं शं मृत्युकायै नमः हृदयादिदक्षहस्तांतम्। ऊँ ह्रीं षं पीतायै नमः हृदयादिवामहस्तांतम्। ऊँ ह्रीं सं श्वेतायै नमः हृदयादिदक्षपादांतम्। ऊँ ह्रीं हं अरूणायै नमः हृदयादि वामपादान्तम्। ऊँ ह्रीं त्रं असितायै नमः मूर्द्धादिपादांतम्। ऊँ ह्रीं क्षं अनंतायै नमः पादादिमूर्द्धान्तम्। (शंभुभक्तश्चेत् श्रीकण्ठादिमातृकाकलान्यासं वैष्णवस्तु केशवादिन्यासं गणेशभक्तो विघ्नेशादिकलान्यासं शाक्तश्चेत् निवृत्त्यादि कलान्यासं च कुर्यात्। तत्तत्कलान्याससस्तु स्वस्वप्रयोगे स्पष्टो भविष्यति) एवं तत्तद्देवताकलान्यासं कृत्वा प्राणानायम्य स्वमूलमन्त्रस्य कल्पोदितान् ऋषिच्छन्दोदैवतादिन्यासान् तत्तदंगेषु न्यस्य करन्यासं हृदयादिषडंगन्यासं च कृत्वा पीठन्यासं कुर्यात्। स्वदेहं पीठमयं विचिन्त्य न्यसेत्। तद्यथा - आधारे ऊँ मं मण्डूकाय नमः। लिंगे ऊँ कां कालाग्नि रुद्राय नमः। नाभौ ऊँ कूं कूर्माय नमः। हृदये ऊँ भां आधारशक्तये नमः। ऊँ अं अनंताय

नमः। ऊँ धं धरायै नमः। ऊँ सुं सुधासिंधवे नमः। ऊँ श्वं श्वेतद्वीपाय नमः। ऊँ सुं सुरांघ्रिपाय नमः। ऊँ मं मणिहर्म्याय नमः। ऊँ हें हेमपीठाय नमः। दक्षांसे ऊँ धं धर्माय नमः। वामांसे ऊँ ज्ञां ज्ञानाय नमः। वामोरौ ऊँ वैं वैराग्याय नमः। दक्षोरौ ऊँ ऐं ऐश्वर्याय नमः। मुखे ऊँ अं अधर्माय नमः। वामपार्श्वे ऊँ अं अज्ञानाय नमः। नाभौ ऊँ अं अवैराग्याय नमः। दक्षपार्श्वे ऊँ अं अनैश्वरर्याय नमः। पुनर्हृदये ऊँ अं अनन्ताय नमः। ऊँ तं तत्त्वपक्षाय नमः। ऊँ आं आनन्दमयकन्दाय नमः। ऊँ सं संविन्नालाय नमः। ऊँ विं विकारमयकेसरेभ्यो नमः। ऊँ प्रं प्रकृत्यात्मकपत्रेभ्यो नमः। ऊँ पं पंचाशद्वर्णकर्णिकायै नमः। कर्णिकायाम् ऊँ सूं सूर्यमण्डलाय नमः। ऊँ इं इन्दुमण्डलाय नमः। ऊँ पां पावकमण्डलाय नमः। ऊँ सं सत्त्वाय नमः। ऊँ रं रजसे नमः। ऊँ तं तमसे नमः। ऊँ आं आत्मने नमः। ऊँ पं परमात्मने नमः। ऊँ ह्रीं ज्ञानात्मने नमः। ऊँ मां मायातत्त्वाय नमः। ऊँ कं कलातत्त्वाय नमः। ऊँ विं विद्यातत्त्वाय नमः। ऊँ पं परतत्त्वाय नमः।

मानसोपचारैः पंचोपचारैर्वा संपूज्य तत्रैव तत्तत्कल्पोक्तपीठशक्तिर्विन्यस्य संपूज्य दिग्रक्षणार्थं रक्षोघ्नसूक्तं पठेत्। तत्र मंत्राः-

ऊँ रक्षोहणम्वलगहनम्वैष्णवीमिदमहन्तम्वलगमुत्किरामि यन्मे निष्ठ्यो यममात्यो निचखानेहृदयमन्तम्वलगमुत्किरामि यन्मे समानो यमसमानो निचखानेदमहन्तं वलगमुत्किरामि यन्मे सबन्धुर्यमसबन्धुर्निचखाने दमहन्तम्वलगमुत्किरामि यन्मे सजातो यमसजातो निचखानोत कृत्यांगिरामि।।१।। रक्षोहणौ वौ वलगहनः प्रोक्षामि वैष्णवान्रक्षोहणौ वौ वलगहनो वनयामि वैष्णवान्रक्षोहणो वो वलगहनो वस्तृणामि वैष्णवान्रक्षोहणो वा वलगहनाऽउपदधामि वैष्णवी रक्षोहणौ वां वलगहनौ पर्यूहामि वैष्णवी वैष्णवमसि वैष्णवास्थ।। २।। रक्षसाम्भागोऽसि निरस्तꣳ रक्षऽइदमहꣳ रक्षोऽभितिष्ठामीदमहꣳ रक्षोवबाधऽइदमहꣳ रक्षो धमन्तमो नयामि घृतेन द्यावापृथिवीप्रोर्णुवाथां वायो वेस्तोकानामग्नि राज्यस्य वेत्तु स्वाहाकृते। ऊर्ध्वनभसं भारुतं गच्छातम्।।३।। रक्षोहा विश्वचर्षणिरभियोनिमयोहते द्रोणासधस्थ मासादत।।४।। अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः। ये भूता विघ्नकार्तरस्ते नश्यन्तु शिवाज्ञया।।१।। अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामविरोधेन शान्तिकर्म समारभे।।२।। यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वतः। सर्वेषामविरोधेन शान्तिकर्म समारभे।।३।। यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वतः। स्थानं त्यक्ता तु तत्सर्वं यत्रस्थं तत्र गच्छतु।। ४।। भूतप्रेतपिशाचाद्या

अपक्रामन्तु राक्षसा:। स्थानादस्माद् व्रजन्त्वन्यत्स्वीकरोमि भुवं त्विमाम्।।५।। भूतानि राक्षसा वापि यत्र तिष्ठन्ति केचन। ते सर्वेऽप्यपगच्छन्तु शान्तिकं तु करोम्यहम्।।६।।

अथ षोडशोपचारपूजनं (भुवनेश्वरी रहस्ये पृ ७७-८७ एवं ९१-९६ ) कृत्वा

## भुवनेश्वरीस्तुति:

प्रसीद प्रपंचस्वरूपे प्रधाने प्रकृत्यात्मिके प्राणिनां प्राणसंज्ञे।
प्रणोतुं प्रभो प्रारभे प्रांजलिस्त्वां प्रकृत्याप्रतर्क्यप्रकामप्रवृत्ते।।१।।
स्तुतिर्वाक्यबद्धा पदात्मैव वाक्यं पदं त्वक्षरात्माऽक्षरं त्वं महेशि।
ध्रुवं त्वां त्वमेवाक्षरैस्त्वन्मयै: स्तौष्यतस्त्वन्मयी वाक्प्रवृत्तिर्यत: स्यात्।।२।।
अजाधोक्षजत्रीक्षणाश्चापि रूपं परं नाभिजानन्ति मायामयं ते।
स्तुवन्तीशि तां त्वाममी स्थूलरूपां तदेतावरम्बेह युक्तं ममापि।।३।।
नमस्ते समस्तेशि बिन्दुस्वरूपे नमस्ते परत्वेन तत्त्वाभिधाने।
नमस्ते महत्वं प्रपन्ने प्रधाने नमस्ते त्वहटारतत्त्वस्वरूपे।।४।।
नम: शब्दरूपे नमो व्योमरूपे नम: स्पर्शरूपे नमो वायुरूपे।
नमो रूपतेजोरसाम्भ:स्वरूपे नमस्तेऽस्तु गन्धात्मिके भूस्वरूपे।।५।।
नम: श्रोत्रचर्माक्षिजिह्वाख्यनासास्यवाक्पाणिपत्पायु सोपस्थरूपे।
मनो बुद्ध्यहंकारचित्तस्वरूपे विरूपे नमस्ते विभो विश्वरूपे।६।।
रवित्वेन भूत्वान्तरात्मा दधासि प्रजाश्चन्द्रमस्त्वेन पुष्णासि भूय:।
दहस्यग्निमूर्ति दधत्वाहुतिं वा महादेवि तेजस्त्रयं त्वत्त एव।।७।।
चतुर्वक्त्रयुक्ता लसद्धसवाहा रज:संश्रिता ब्रह्मसंज्ञां दधाना।
जगत्सृष्टिकार्या जगन्मातृरूपे वरं त्वत्पदं ध्यायसीशि त्वमेव।।८।।
विराजत्किरीटा लसच्छंखचक्रा वहन्ती च नारायणाख्यां जगत्सु।
गुणं सत्वमास्थाय विश्वस्थितिं य: करोतीह सोंऽशोऽपि देवि त्वमेव।९।।
जटाबद्धचन्द्राहिगंगां त्रिनेत्रां जगत्संहरन्तीं च कल्पावसने।
तम: संश्रितां रुद्रसंज्ञां दधाना वहन्ती परश्वक्षमाले विभासि।।१०।।
सचिन्ताक्षमाला सुधाकुम्भलेखाधरा त्रीक्षणार्धेन्दुराजत् कपर्दा।
सुशुक्लांशुकाकल्पदेहा सरस्वत्यपि त्वन्मयैवेशि वाचामधीशा।।११।।
लसच्छंखचक्रा चलद्खंगभीमानदत् सिंहवाहा ज्वलत्तुंगमौलि:।
द्रवद् दैत्यवर्गा स्तुवत् सिद्धवर्गा त्वमम्बेशि दुर्गापि सर्गादिहीने।।१२।।
पुरारातिदेहार्धभागा भवानी गिरीन्द्रात्मजात्वेन यैषा विभासि।
महायोगिवन्द्या महेशा सुनाथा महेश्यम्बिका तत्त्वतस्त्वन्मयैव।।१३।।
लसत्कौस्तुभोद्भासिते व्योमनीले वसन्तीं च वक्ष:स्थले कैटभारे:।
जगद्वल्लभां सर्वलोकैकनाथां श्रियं त्वां महादेव्यहं तामवैमि।।१४।।

अजाद्रीड्गुहाब्जाक्षपोत्रीन्द्रकाणां महाभैरवस्यापि चिह्नं वहन्त्यः।
विभो मातरः सप्त तद्रूपरूपाः स्फुरन्त्यस्त्वदंशा महादेवि ताश्च।।१५।।
समुद्यद्दिवाकृत्सहस्राभभासा सदा सन्तताशेषविश्वावकाशे।
लसन्मौलिबद्धेन्दुलेखे सपाशांकुशाभीत्यभीष्टात्तहस्ते नमस्ते।१६।।
प्रभा कीर्तिकान्ती दिवारात्रिसन्ध्याः क्रियाशा तमिस्रा क्षुधाबुद्धिमेधाः।
धृतिर्वाङ्मतिस्सन्मतिश्श्रीश्चकान्तिस्त्वमेवेशि येऽन्ये च शक्तिप्रभेदाः।।१७।।
हरे बिन्दुनादैः सशक्त्याख्यशान्तैर्नमस्तेऽस्तु भेदप्रभिन्नैरभिन्ने।
सदा सप्तपाताललोकाचलाब्धिगुहद्वीपपधातुस्वरादिस्वरूपे।१८।।
नमस्ते नमस्ते समस्तस्वरूपे समस्तेषु वस्तुष्वनुस्यूतरूपे।
अतिस्थूलसूक्ष्मस्वरूपे महेशि स्मृते बोधरूपेऽप्यबोधस्वरूपे।१९।।
मनोवृत्तिरस्तु स्मृतिस्ते समस्ता तथा वाक् प्रवृत्तिः स्तुतिः स्यान्महेशि।
शरीरप्रवृत्तिः प्रणामक्रिया स्यात् प्रसीद क्षमस्व प्रभो सन्ततं मे।।२०।।
हृल्लेखाजपविधिसमर्चनविशेषानेतांस्तां स्तुतिमपि नित्यमादरेण।
योऽभ्यसेत् स खलु परां श्रियं च गत्वा शुद्धः स व्रजति परस्यधाम्नः।।२१।।
।। इति भुवनेश्वरीदेवताप्रसादसिद्ध्यर्थे भुवनंश्वरीस्तुतिं समर्पयामि।।

## भ्रमराम्बाष्टकम्

चांचल्यारुणलोचनांचितकृपाचन्द्रार्कचूडामणिम्
चारुस्मेरमुखां चराचरजगत् संरक्षणीं तत्पदाम्।
चंचच्चम्पकनासिकाग्रविलसन् मुक्तामणिरंजिताम्
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये।।१।।

कस्तूरीतिलकांचितेन्दुविलसत् प्रोद्भासिफालस्थलीम्,
कर्पूरद्रवमिश्रचूर्णखदिरामोदोल्लसद्वीटिकाम्।
लोलापांगतरंगितैरधिकृपासारैर्नता नन्दिनीं
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये।२।।

राजन्मत्तमरालमन्दगमनां राजीवपत्रेक्षणाम्
राजीवप्रभवादिदेवमुकुटै राजत्पदाम्भोरुहाम्।
राजीवायतेन्दुमण्डितकुचां राजाधिराजेश्वरीम्,
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये।।३।।

षट्तारां गणदीपिकां शिवसतीं षड्वैरिवर्गापहाम्,
षट्चक्रान्तरसंस्थितां वरसुधां षड्योगिनीवेष्टिताम्।
षट्चक्रांचितपादुकांचितपदां षड्भावगां षोडशीम्,
श्री शैलस्थलवासिनीं भगवतीं श्रीमातरं भावये।।४।।

श्रीनाथादृतपालितत्रिभुवनां श्रीचक्रसंसारिणीम्
ज्ञानासक्तमनोजयौवनलसद् गन्धर्वकन्याद्रिताम् ।
दीनानामतिवेलभाग्यजननीं दिव्याम्बरालङ्कृताम्,
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ।५ । ।

लावण्याधिकभूषितांकतिलकां लाक्षालसद्रागिणीम्,
सेवायातसमस्तदेववनितां सीमान्तभूषान्विताम् ।
भावोल्लासवशीकृतप्रियतमां भण्डासुरच्छेदिनीम्,
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये । ।६ । ।

धन्यां सोमविभावनीयचरितां धाराधरश्यामलाम्,
मुन्याराधनमेधिनीं सुमहतां मुक्तिप्रदानव्रताम् ।
कन्यापूजनसुप्रसन्नहृदयां कांचीलसन्मध्यमाम्,
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये । ।७ । ।

कर्पूरागुरुकुङ्कुमांकितकुचां कर्पूरवर्णस्थिताम्,
कृष्टोत्कृष्टसुकृष्टकर्मदहनां कामेश्वरीं कामिनीम् ।
कामाक्षीं करुणारसार्द्रहृदयां कल्पान्तरस्थायिनीम्,
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये । ।८ । ।

गायत्रीं गरुडध्वजां गगनगां गन्धर्वगानप्रियाम्,
गम्भीरां गजगामिनीं गिरिसुतां गन्धाक्षतालङ्कृताम् ।
गंगागौतमगर्गसन्नुतपदां गां गौतमीं गोमतीम्,
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये । ।९ । ।

। । इति भुवनेश्वरीदेवीप्रसादसिद्ध्यर्थे भ्रमराम्बाष्टकं समर्पयामि । ।

<u>अथ चिन्तामणिप्रयोगः</u> :-

ॐ अस्य श्रीचिन्तामण्याख्यभुवनेश्वरीमन्त्रस्य शक्तिर्ऋषिर्गायत्रीच्छन्दो भुवनेश्वरी देवता, हकारो बीजम्, ईकारः शक्तिः, रेफः कीलकं, मम चतुर्वर्गफलसिद्ध्यर्थे जपे विनियोगः ।

ऋष्यादिन्यासः- ॐ अस्य श्रीचिन्तामण्याख्यभुवनेश्वरीमन्त्रस्य शक्तिऋषये नमः (शिरसि)। गायत्रीच्छन्दसे नमः (मुखे)। श्रीभुवनेश्वरीदेवतायै नमः (हृदये)। हकारबीजाय नमः (गुह्ये)। ईकारशक्तये नमः (पादयोः)। रकारकीलकाय नमः (नाभौ)। मम चतुर्वर्गफलसिद्ध्यर्थे जपे विनियोगाय नमः (सर्वांगे)।

<u>अथ कर-षडंग न्यास</u> :-

ॐ ह्रां नमः - अंगुष्ठाभ्यां नमः । हृदयाय नमः ।

ॐ ह्रीं नमः - तर्जनीभ्यां नमः।		शिरसे स्वाहा।
ॐ ह्रूं नमः - मध्यमाभ्यां नमः।		शिखायै वषट्।
ॐ ह्रैं नमः - अनामिकाभ्यां नमः।		कवचाय हुम्।
ॐ ह्रौं नमः - कनिष्ठिकाभ्यां नमः।		नेत्रत्रयाय वौषट्।
ॐ ह्रः नमः - करतलकरपृष्ठाभ्यां नमः।	अस्त्राय फट्।

<u>अथ ध्यानं</u> :- बालरविद्युतिमिन्दुकिरीटां तुंगकुचां नयनत्रययुक्ताम्।
स्मेरमुखीं वरदाङ्कुशपाशाभीतिकरां प्रभजे भुवनेशीम्।।

तदनन्तरं - 'ॐ ह्रीं ॐ' इति त्र्यक्षरीचिन्तामण्याख्यभुवनेश्वरीमन्त्रस्य जपं कुर्यात्।।

## <u>अथाष्टोत्तरशतनामस्तोत्रम्-</u>

अस्य श्रीभुवनेश्वर्यष्टोत्तरशतनामस्तोत्रस्य शक्तिर्ऋषिः। गायत्रीछन्दः। श्रीभुवनेश्वरी देवता। हकारो बीजम्। ईकारः शक्तिः। रेफः कीलकं। मम चतुवर्गफलसिद्ध्यर्थे पाठे विनियोगः।

*अस्य न्यासध्यानादिकं चिन्तामणिमन्त्रवद् कुर्यात्।*

महामाया महाविद्या महायोगा महोत्कटा।
माहेश्वरी कुमारी च ब्रह्माणी ब्रह्मरूपिणी।।१।।
वागीश्वरी योगरूपा योगिनीकोटिसेविता।
जया च विजया चैव कौमारी सर्वमंगला।।२।।
हिंगला च विलासी च ज्वालिनी ज्वालरूपिणी।
ईश्वरी क्रूरसंहारी कुलमार्गप्रदायिनी।।३।।
वैष्णवी सुभगाकारा सुकुल्याकुलपूजिता।
वामांगा वामचारा च वामदेवप्रिया तथा।।४।।
डाकिनी योगिनीरूपा भूतेशी भूतनायिका।
पद्मावती पद्मनेत्रा प्रबुद्धा च सरस्वती।।५।।
भूचरी खेचरी माया मातंगी भुवनेश्वरी।
कान्ता पतिव्रता साक्षी सुचक्षुः कुण्डवासिनी।।६।।
उमा कुमारी लोकेशी सुकेशी पद्मरागिणी।
इन्द्राणि ब्रह्मचाण्डाली चण्डिका वायुवल्लभा।।७।।
सर्वधातृमयीमूर्तिर्जलरूपा जलोदरी।

आकाशी रणगा चैवानृकपालविभूषणा।।८।।
नर्मदा मोक्षदा चैव कामधर्मार्थदायिनी।
गायत्री चाथ सावित्री त्रिसन्ध्या तीर्थगामिनी।।९।।
अष्टमी नवमी चैव दशम्येकादशी तथा।
पौर्णमासी कुहूरूपा तिथिमूर्तिस्वरूपिणी।।१०।।
सुरारिनाशकारी च उग्ररूपा च वत्सला।
अनला अर्धमात्रा च अरुणा पीतलोचना।।११।।
लज्जा सरस्वती विद्या भवानी पापनाशिनी
नागपाशधरा मूर्तिरगाधा धृतकुण्डला।।१२।।
क्षत्ररूपा क्षयकरी तेजस्विनी शुचिस्मिता।
अव्यक्ता व्यक्तलोका च शम्भुरूपा मनस्विनी।।१३।।
मातंगी मत्तमातंगी महादेवप्रिया सदा।
दैत्यघ्नी चैव वाराही सर्वशस्त्रमयी शुभा।।१४।।

इति श्रीभुवनेश्वरीदेवताप्रसादसिद्ध्यर्थे भुवनेश्वर्यष्टोत्तरशतनामस्तोत्रं समर्पयामि।

अथ हवनमुत्तरकृत्यं च :- (भुवनेश्वरी रहस्ये पृ ९८-११९, १४५-१७४ एवं १७७-१८० ) च कृत्वाऽनुष्ठानं समापयेत्।। हवने विशेषः :- विध्यनुसारेण आज्याघारादिहोमानां कृत्वा चिन्तामणिमंत्रस्य हवनात्पूर्वं केवलाज्येन एते आहुतयः देया - ॐ श्री प्रजापतये स्वाहा, ॐ श्री इन्द्राय स्वाहा, ॐ श्री यमाय स्वाहा, ॐ श्री निर्ऋतये स्वाहा, ॐ श्री वरुणाय स्वाहा, ॐ श्री वायवे स्वाहा, ॐ श्री सोमाय स्वाहा, ॐ श्री ईशानाय स्वाहा, ॐ ब्रह्मण्यै स्वाहा, ॐ माहेश्वर्यै स्वाहा, ॐ कौमार्यै स्वाहा, ॐ वैष्णव्यै स्वाहा, ॐ वाराह्यै स्वाहा, ॐ इन्द्राण्यै स्वाहा, ॐ चामुण्डायै स्वाहा, ॐ महालक्ष्म्यै स्वाहा, ॐ भुवनेश्वर्यै स्वाहा।




<u>अत्रावधेयं</u> :-

१. कृष्णपक्षत्रयोदश्यां रात्रौ ताम्रपत्रे भोजपत्रे वा मूलमंत्रं विलिख्य सप्तशतीं पठित्वा पायसं (खीर) नैवेद्यं समर्प्य साष्टांगप्रणामं कुर्यात्।

२. कृष्णपक्षस्य अष्टम्यां चतुर्दश्यां च प्रात:काले सर्वस्वार्पणं तदर्थप्रार्थनां च कर्तव्यं नान्यत्किंचित्कर्तव्यं भवति।

३. नित्यपूजायां फलं, गुड, घृतं, मधु, अश्मशर्करा, शर्करा वा नैवेद्ये देया।

४. पूर्वाभिमुखो उत्तराभिमुखो वा उपविश्य निश्चितासने देशे काले च जपं कर्तव्यं।

<u>सूचना</u> :-

"<u>भुवनेश्वरी रहस्यं</u>" -लेखक : पं. श्री अशोक कुमार गौड,
प्रकाशक : चौखम्बा सुरभारती प्रकाशन, वाराणासी।
संस्करणं : २००८ ई.
मूल्यं : १५० / =

– हरि: ॐ तत्सत् –